In Public domain. Digitization Muthulakshmi Research Academy
संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला (iii) - 01

कूचिमञ्चि तिम्मकविप्रणीता

॥ सुजनमनःकुमुदचन्द्रिका ॥

(गद्यप्रबन्धः)

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः परियोजना – अनुसन्धाता च
आचार्यः के. नीलकण्ठः
निदेशकः

सम्पादिका
डा. के. वरलक्ष्मीः
उपनिदेशिका

सहायकः
डा. के. वि. सूर्यप्रकाशः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2023

In Public domain. Digitization Muthulakshmi Research Academy

Digitized by Arya Samaj Foundation Chennai and eGangotri. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी पद्यग्रन्थमाला (iii) - 01

कूचिमञ्चि तिम्मकविप्रणीता

॥ सुजनमनःकुमुदचन्द्रिका ॥

(गद्यप्रबन्धः)

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः परियोजना – अनुसन्धाता च

आचार्यः के. नीलकण्ठः

निदेशकः

सम्पादिका

डा. के. वरलक्ष्मीः

उपनिदेशिका

सहायकः

डा. के. वि. सूर्यप्रकाशः

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2023

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (iii)- 01

Sujanamanaḥkumudacandrikā

(Re-printing of rare book project)
This book is published with the financial support under Ashtadashi Scheme of **Central Sanskrit University, New Delhi**

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Sujanamanaḥ kumudacandrikā

ISBN – 978-93-80171-94-4

© Sanskrit Academy

Year : 2023
Pages : xxx+75
Copies : 300
Price : ₹ 300

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (iii)- 01

Sujanamanaḥkumudacandrikā

of

Kūcimañci Timmakavi

(Published under 'Reprinting of rare books project', Ashtadashi scheme of Central Sanskrit University, New Delhi)

Chief-Editor & Project Investigator

Prof. K. Neelakantham

Director

Editor

Dr. K. Varalakshmi

Dy. Director

Assistance

Dr. K. V. Suryaprakash

Sanskrit Academy

Adarsha Shodha Sanstha

(Recognised by Central Sanskrit University, New Delhi)

Osmania University,

Hyderabad – 500 007

2023

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (iii)- 01

Sujanamanaḥkumudacandrikā

(Re-printing of rare book project)
This book is published with the financial support under Ashtadashi Scheme of **Central Sanskrit University, New Delhi**

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Sujanamanaḥ kumudacandrikā

ISBN – 978-93-80171-94-4

© Sanskrit Academy

Year	:	2023
Pages	:	xxx+75
Copies	:	300
Price	:	₹ 300

In Public domain. Digitization Muthulakshmi Research Academy

Preface

ओम् श्री गुरुभ्यो नमः

।।श्रीशङ्करभगवत्पादाः विजयन्ते।।

Definition of Prose and its impact on poets:

अपादः पदसन्तानो गद्यम् "a succession of words not amenable to division into metrical feet is called prose". Prose style attained a certain degree of development in the Vedic period itself. यजुर्वेदसंहिता and ब्राह्मणग्रन्थ s contain beautiful prose passages. Puranas and Mahabharata also preserve a few ancient stories in simple and ravishing prose style. Books on grammar and philosophy too dealt with in prose. Patanjali wrote Mahabhashya in majestic but in simple prose style.

During the period just before and after the commencement of Christian era, literary prose style practically ignored and every branch of literature was written in verse form by the poets and authors of various shastras like Mathemetics, Astronomy and even Medicine. It was just because the verses are very easy to memorize and the metrical language has a better appeal than ordinary prose.

To impress upon the reader through prose, the poet requires great skill and ability. Only great and well-versed poets can compose prose works of a highly literary standard and hence it is said गद्यं कवीनां निकषं वदन्ति.

Some important Prose works:

Here are some famous prose works that were composed in the ancient and later times: -

Poets	Works
सुबन्धुः	वासवदत्ता

In Public domain. Digitization Muthulakshmi Research Academy

दण्डी	दशकुमारचरितम्
बाणभट्टः	कादम्बरी, हर्षचरितम्
धनपालः	तिलकमञ्जरी
वादीभसिंहः	गद्यचिन्तामणिः
अगस्त्यः	कृष्णचरितम्
वामनभट्टबाणः	वेमभूपालचरितम्
अम्बिकादत्तव्यासः	शिवराजविजयम्

The present work:

Sujanamanahkumudachandrika:

Now we are very happy to bring out सुजनमनः कुमुदचन्द्रिका (*Sujanamanahkumudachandrika*) a gadyakavya composed by Kuchimanchi Timmakavi. He is said to have been lived during 1778-1828. This poet was a devotee of Kukkuteshwara of Pithapuarm in Andhrapradesh. According to the history, this Timmakavi was the fifth one and there were four more Timmakavis in the same scholarly family. Many of the researchers and authors of History of literature books were in the opinion that Kuchimanchi Timmakavi who was the author of several Telugu Kavyas, was the author of this present work *Sujanamanahkumudachandrika.* But it was a well-known author and critic Prof Tumati Donappa former Vice-chancellor of Telugu University in erstwhile Andhrapradesh who made a thorough research on Kingdoms of Andhra Region and their contribution to the literature (ఆంధ్రసంస్థానములు–సాహిత్యపోషణమ్) has given a detailed note on *Sujanamanahkumudachandrika* and its author Kuchimanchi Timmakavi.

In Public domain. Digitization Muthulakshmi Research Academy

About the Manuscript:

The manuscript of this Gadyakavya (*Sujanamanahkumudachandrika)* bearing the number **Acc.No.133/A, call no S5-237** is available in the Government oriental manuscript library of Telangana State in Hyderabad. It seems that this manuscript is written in Telugu and it is copied in beautiful Devanagari script during 1915-16 in Kakinada of Andhrapradesh[1].

The importance of the work:

Despite being a Gadyakavya, *Sujanamanah kumudachandrika,* it consists of 100 slokas. Therefore, some of critics tried to say that this is a champukavya but Prof Sri Rama murthy and Prof. Donappa have proved that this is Gadyakavya. They have shown many references from the book in support of their views. And the poet Kuchimanchi Timmakavi also clearly mentioned at the conclusion of the book that this is a *gadyakavya*[2].

Apart from this, Kuchimanchi Timmakavi has followed the earlier authors of prose literature in Sanskrit and composed this glamorous gadyakavya. While narrating the story he has beautiful descriptions. He has shown all poetic merits which were defined by the rhetoricians of Sanskrit. He shows great skill and discrimination in characterization. When we look in to theme of his Kavya, he reminds us the Banamahakavi's Kadambari in using Alankaras like Upama, Utpreksha, Rupaka, Virodha and Slesha. He has all the four types of prose forms like मुक्तकम्,

---

1. Transcribed from a palm-leaf MS of D.V. Prakasa Rao of Kokanada in 1915-16

2 'इति श्रीमत्कुक्कुटेश्वर.....तिम्मकविनामधेयेन विरचिता सुजनमनःकुमुदचन्द्रिका नाम गद्यकाव्यं समाप्तम्'।

In Public domain. Digitization Muthulakshmi Research Academy

वृत्तगन्धि, उत्कलिकाप्रायम्, चूर्णकम् which enhance the beauty this Kavya. Banamahakavi says that नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः। विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुर्लभम्[3]। Here Timmakavi has all these merits in his Kavya and makes the readers feel as if they are reading the excellent prose work Kadambari of Banabhatta. Banabhatta was one of the brightest stars in galaxy of Sanskrit poets. His prose works were regarded as the finest specimens of the Panchali[4] style of composition.

Story in brief:

King Kushalavarty was ruling over Kalingadesha. Once his son Mahabhaga goes to Himalayas and being impressed by the nature stays there itself and meditates upon lord Shiva and Parvati. With the blessings of them he goes to Amaravati and sees the divine horse ucchaishravas. He meets with Lord Indra. Lord Indra honours Mahabhaga with great hospitality and on the request of Indra he narrates the following story to him.

There was a king called Sangaronmukha ruling over the country Kerala with the help of his minister Aryahita. Sangaronmukha requests Aryahita to educate his son Karalavaktra. Karalavaktra learns all the shastras sincerely from Aryahita and being encouraged by his friend Kusumashekhara goes to the forest for hunting. He meets there with sage Sumukha. Sumukha pleases with the behaviour of Karalavaktra and gives him Upadesha. After this, Karalavaktra meets Lavanyavati near a pond and both of them introduce to each other. Lavanyavati says that her

---

[3] हर्षचरितम् 8

शब्दार्थयोः समो गुम्फः पाञ्चाली रीतिरिष्यते। शिलाभट्टारिका वाचि बाणोक्तिषु च सा यदि।।

(In the Panchali style word and sense should equally balanced)

In Public domain. Digitization Muthulakshmi Research Academy

name is Manjari and she was the daughter of Vasanta a tribal leader. When both were in conversation the maid of Manjari comes there and takes her away to their place.

Later, a parrot comes to the palace of Karalavaktra and tells him about Manjari and her grief of separation from him. Karalavaktra, goes immediately to Manjari and takes her hand and spends whole time with her. On the wish of Manjari, he tries to trace a beautiful parrot and falls down from a huge tree and dies suddenly. He, while falling down from the tree, takes the name Lord Shiva. Though the men of Yama come there to take him to their abode, Lord Shiva rescues him saying that he has taken my name while dying and hence he is my devotee and Yama should leave him. Thus, narrating the story to Indra, Mahabhaga performs his Anusthana and wanders between Vaikuntha and Kailasa.

***

I appreciate the honest efforts of Dr K. Varalakshmi, Deputy Director of the academy. She made a thorough research on the life of Kuchimanchi Timmakavi and studied well this book सुजनमनःकुमुदचन्द्रिका and prepared a very comprehensive foreword that could be useful for further research on the contributions of Samsthanas in two Telugu speaking states. I congratulate Dr K. Varalaksmi and wish her to bring some more critical studies based on the rare Sanskrit works.

I thank another amicable deputy director Dr V. Subrahmanyam and Dr K. V. Suryaprakash and Dr Joshi Santosh Kumar research assistants for their continuous help in the publications of Academy. I bless my young and sincere research scholar Mr Joshi Bharadwaj who made this book ready for publication.

In Public domain. Digitization Muthulakshmi Research Academy

I thank Prof Srinivasa Varkhedi Hon'ble V.C. and Prof. Gayathri Muralikrishna Registrar I/c and Director, Aadharsh Institutions Central Sanskrit University, New Delhi for their continuous encouragement and for sanctioning such projects to Sanskrit Academy. I thank our Hon'ble Chairman Prof. D. Ravinder V. C. and Prof. P. Lakshmi Narayana, Registrar of Osmania University for their amicable support for the development of Sanskrit Academy.

I thank Karshak Art Printers Vidyanagar, Hyderabad for printing this book on time.

सुधीजनविधेयः

Prof. K. Neelakantham
Director

In Public domain. Digitization Muthulakshmi Research Academy

सुजनमनःकुमुदचन्द्रिका

(सरसहृत्कुमुदचन्द्रिका)

हस्तलिखितमातृकाग्रन्थविवरणम्

सरसहृत्कुमुदचन्द्रिका इति नामान्तरेणापि प्रसिद्धिं गतमिदं गद्य काव्यम् अमुद्रितहस्तलिखितमातृकाग्रन्थम् आश्रित्य सम्पादितमस्ति। हस्तलिखितग्रन्थः तेलङ्गाणाराज्यस्थे प्राच्यलिखितग्रन्थालये संरक्षितमस्ति। Acc No. 133/A, Call no S5-237 इति ग्रन्थसूचीविवरणं दृश्यते। समग्ररूपेण ग्रन्थः उपलभ्यते। देवनागरीलिप्या लिखितमस्ति। मूलतः तालपत्रनिबद्धमिदं गद्यकाव्यमिति अस्य लिप्यन्तरीकरणं क्रिस्ताब्दे 1915-16 मध्यकाले दिनाङ्के कोकनाडजनपदे विहितमिति 3.5.15 दिनाङ्के कार्यं समाप्तिं गतमिति च ज्ञायते[5]।

1. कूचिमञ्चि तिम्मकविः

काव्यान्ते गद्यकाव्यस्यास्य रचयितुः कूचिमञ्चि तिम्मकवेः विवरणम् उपलभ्यते। स्वयं कविना इष्टदेवतागोत्रपितृपाद-गुरुवर्यादीनां संस्मरणं विहितम्। पिठापुरस्थ कुक्कुटेश्वरालयस्य आराध्यदेवः कुक्कुटेश्वरः कूचिमञ्चिवंशस्य कुलदेवः। कौण्डिन्यगोत्रोत्पन्नोऽयं तिम्मकविः कूचिमञ्चि जग्गनामात्यस्य पुत्रः देवुलपल्लि सीतारामान्तर्वाणेः शिष्यश्चेति स्ववृत्तं न्यवेदयत्[6]। काव्येऽस्मिन् तिम्मकविः संक्षिप्तं स्ववंशविवरणं प्रादात् इत्यतः

---

[5] Transcribed from a palm-leaf MS of D.V. Prakasa Rao of Kokanada in 1915-16

[6] इति श्रीमत्कुक्कुटेश्वरप्रसादलब्धकवितासम्पादितयशस्सान्द्रेण निखिलमन्त्रिकुलचन्द्रेण जिततततानद्धकौशलकलापेन समाराधनमुदितकुमुदहितकलापेन कौण्डिन्यगोत्रपवित्रेण कूचिमञ्चि जग्गनामात्यपुत्रेण देवुलपल्लिकुलपयोनिधिराकासुधाकरस्य सकलविद्याकरस्य

In Public domain. Digitization Muthulakshmi Research Academy

कविवंशवृक्षादीनि विवरणानि काव्यादस्मात् सङ्ग्रहीतुं नैव शक्यते। *संस्कृतसाहित्यचरित्रम्, चारित्रकसामाजिकनेपथ्यंलो तेलुगुसाहित्यचरित्रम्, आन्ध्रसंस्थानमुलु साहित्यपोषणम्,* Contribution of Andhras to Sanskrit Literature, पिठापुरसंस्थानम्–कविपण्डितपोषणम् सुकविमनो रञ्जनम् इत्यादीनां ग्रन्थानामनुशीलनेन कवेः कालस्य, कृतीनां, काव्यशैल्याश्च सुस्पष्टं विवरणं लभ्यते।

2. संस्कृतसाहित्यचरित्रम्

इति नामके ग्रन्थे चम्पूकाव्यविभागे प्राचार्यः मुदिगण्टि गोपालरेड्डि वर्यः काव्यस्यास्य स्तोकं विवरणं प्रास्तौत्। तिम्मकविः तेलुगुभाषा साहित्यक्षेत्रेऽपि प्रसिद्धिं गतः। संस्कृतेन सुजनमनोरञ्जनकाव्यं व्यरचयत्। सोड्डलस्य उदयसुन्दरिकथेव विरलाः श्लोकाः काव्येऽस्मिन् विराजन्ते। तिम्मकविः पिठापुरस्य नीलाद्रिरायस्य (क्रि.श. 1778-1828) आस्थानकविः। कविः बाणस्य कादम्बरी शैलीम् अन्वसरत्।

3. चारित्रकसामाजिकनेपथ्यंलो तेलुगुसाहित्यचरित्रम्

प्राचार्यया मुदिगण्टि सुजातारेड्डिविरचितेऽस्मिन् ग्रन्थे अस्य कवेः सङ्क्षिप्तं विवरणमुपलभ्यते। (पु.सं.290-291) तिम्मकविः (क्रि.श. 1700-56) पिठापुरसंस्थाने कन्दराडग्रामस्य **करणम्** इत्याख्य प्रान्तीयसर्वकारस्य अधिकारपदभाक् आसीत्। रुक्मिणीपरिणयः राजशेखरविलासः नालीसुन्दरीपरिणयः, सारङ्गधरचरित्रम् रसिकजनमनोभिरामं कक्कुटेश्वरशतकम् इत्यादि रचनाः नैकाः चकार। साधारणतया प्राचीनकालात्

परमपवित्रविचित्रतरवाणेः सीतारामान्तर्वाणेः छात्रेण समभ्यसितचतुश्शास्त्रेण सकलसुजनविधेयेन तिम्मकविनामधेयेन विरचिता सजनमनःकुमुदचन्द्रिका नाम गद्यकाव्यं समाप्तम्।

In Public domain. Digitization Muthulakshmi Research Academy

कवयः स्वरचितानि काव्यानि इष्टदेवम्प्रति राजानम्प्रति वा अर्पयन्ति स्म। किन्तु कविरयं स्वरचितं काव्यं राजानम्प्रत्यर्पयितुं न वाञ्छति स्म। तथापि पिठापुराधिपतिः राजा रावुमाधवरायः *कविसार्वभौमः* इति बिरुदेन सत्कृतवान्। तिम्मकविः संस्कृतेन **सुजनमनःकुमुदचन्द्रिकेति** काव्यं व्यरचयत्। कल्पितकथेतिवृत्तोपेतमिदं चम्पूकाव्यमस्ति।

4. आन्ध्रसंस्थानमुलु साहित्यपोषणम्

ग्रन्थेऽस्मिन् तूमाटि दोणप्पवर्यः (पु.सं. 46) श्रीरावु पेदमाधवरावस्य पिठापुरसंस्थानाधिपस्य कविपण्डितपोषणं वर्णयन् कूचिमञ्चि तिम्मकवेः उल्लेखमकरोत्। माधवरायस्य शासनकाले लब्धजनिः कूचिमञ्चि तिम्मकविः (1680) 1700 क्रिस्ताब्दात् काव्यरचनाम् आरभत। क्रिस्ताब्दे 1715 वर्षे रचिते रुक्मिणीपरिणयकाव्ये *'विद्वत्कविश्रेष्ठभटनटामात्य-विस्फारितम्बु...रावु माधवनृपपरिरक्षितमु भोगनिकरम्बु पीठिकापुरवर* [7] इति माधवरायनृपस्य स्तुतिं तिम्मकविः चकार।

बहुलप्रबन्धकर्त्ता कूचिमञ्चि तिम्मकविः रसिकजनमनोभिरामादि-रसवत्कृतीः परिशील्य पिठापुराधिपः माधवरायः(प्रथमः) (1656-1704) एव कविसार्वभौमः इति बिरुदेन तिम्मकविं सत्कृतवान्। तिम्मकवेः रचनाकालः क्रि.श. 1715 तः आरभ्य 1753 यावत् भवतीति विमर्शकानाम् अभिप्रायः। कनिष्ठस्य माधवरायस्य कालः (1710-1755) अपि तिम्मकविरचनाकाले अन्तर्भवति। सुभद्रापरिणयग्रन्थकर्ता कूचिमञ्चि जग्गकविः शतकण्ठरामायण कर्त्ता जग्गकविप्रथमपुत्रः गङ्गनकविश्च माधवरायेण सम्मानितौ। वेङ्कटनीलाद्रि रायः (1778-1828) पिठापुरं 1793-1828 मध्यकाले शशास। कूचिमञ्चि

---

[7] (रुक्मिणीपरिणयमु – 1अ.24.)

In Public domain. Digitization Muthulakshmi Research Academy

तिम्मकवेः प्रपौत्रः चन्द्रमपालेमवास्तव्यः कूचिमञ्चि तिम्मकविराख्यः सुजनमनःकुमुदचन्द्रिका इति गद्यकाव्यं विनिर्ममे। कविरयं कुक्कुटेश्वरभक्तः। गद्यकाव्यमिदं शिवपारम्यबोधकम्।

साहितीविमर्शकाः केचन प्रपितामहस्य कूचिमञ्चि तिम्मकवेः तेलुगुरचनायाः रसिकजनमनोभिरामः इत्यस्य संस्कृतीकरणमिति, काव्यमिदं चम्पूप्रबन्ध इति च साहित्यलोके भिन्नाभिप्रायास्सन्ति। किन्तु तूमाटि दोणप्पवर्यः काव्यशैलीविषयकभ्रान्तीनां सर्वासां निरासनं करोति।

रसिकजनमनोभिरामस्य कथावस्तु सुजनमनःकुमुदचन्द्रिकायाः कथावस्तुनः भिन्नमस्ति। देवतास्तुतिसन्दर्भेषु विभिन्नवृत्तनिबद्धश्लोकास्सन्ति। गद्यकाव्येषु विरलतया श्लोकाः भवन्तीति काव्यविदाम् अनुभवसिद्धविषयः। तथा गद्यकाव्ये पद्यगुम्फनमपि शास्त्राविरुद्धम्। काव्येऽस्मिन् गद्यभागाः चूर्णिकाः इति व्यवहृताः। अतः काव्यमिदं चम्पूप्रबन्धः नैव भवतीति प्रमाणितं शोधलेखं डा.पि.श्रीराममूर्तिवर्यस्य विरचितम् आश्रित्य दोणप्पवर्यः निरूपयति यत् सुजनमनःकुमुदचन्द्रिका गद्यकाव्यशैल्या विरचितम्।

5. Contribution of Andhra to Sanskrit Literature:

डां. पि. राममूर्तिवर्यः स्वग्रन्थे काव्यस्यास्य निरूपणं सम्यक् चकार। तद्ग्रन्थात् वाक्यानि उद्धृत्यात्र प्रदर्शितवान् सः। वेलमनायकाः पिठापुरशासकाः कविपण्डितपोषकाः आसन्। कौण्डिन्यगोत्रोत्पन्नः जग्गनामात्यस्य पुत्रः कूचिमञ्चि तिम्मकविः सुजनमनःकुमुदचन्द्रिका इति रचनायाः कर्ता। रावु वेङ्कटनीलाद्रिरायस्य पिठापुराधिपस्य (1778-1828 A.D.) आस्थानकवेः

In Public domain. Digitization Muthulakshmi Research Academy

देवुलपल्लि सीतारामान्तर्वाणेः शिष्यः। अन्यसाहित्यकारैः उल्लिखितान् भ्रान्तिजनकविशेषान् खण्डयत्ययं साहित्यकारः राममूर्तिवर्यः।[8]

कूचिमञ्चितिम्मकविः पिठापुरस्य नीलाद्रिरायस्य (क्रि.श. 1778-1828) आचार्यायाः सुजाता रेड्डिवर्यायाः **चारित्रकसामाजिक-नेपथ्यंलो तेलुगु साहित्यचरित्रम्** इति ग्रन्थः कवेः कालस्य कृतीनां शैल्याश्च विषये भ्रान्ति जनकान् विषयान् प्रत्यपादयत्। अनेन **सुजनमनःकुमुदचन्द्रिका** कर्तृकत्वं निरूपयितुं काठिन्यमायाति।

1. **प्रथमा भ्रान्तिः** - तिम्मकविः (क्रि.श. 1700-56) पिठापुरसंस्थाने कन्दराडग्रामस्य **करणम्** इत्याख्य प्रान्तीयसर्वकारस्य अधिकारपदभाक् आसीत्।

---

[8] "The Velama chiefs of Pithapuram are well-known as patrons of Sanskrit learning. Kucimanci Timmakavi, who is different from the Telugu author of the same name, was the author of a Gadyakavya in Sanskrit called Sujanamanahkumudacandrika. He was the son of Jagganamatya of Kaundinyagotra and a disciple of Devulapalli Sitaramantarvani, who was a court poet of Rao Venkata Neeladri Rayaningaru, the Rajah of Pithapuram (1778-1828 A.D.). His great-grandfather was Jaggakavisvara, brother of Sujana and he was an accomplished author of several Telugu works. Our author flourished in the early nineteenth century. The prose work was written with the main purpose of teaching devotion to Lord Siva with the example of Karala vaktra, a king of Kerala, who led a life given to pleasures but was saved since he remembered Lord Siva at the time of death. The work is mainly in prose interspersed with a few Slokas in different metres and they are all 293 in number. It bears a close resemblance to the Kadambari of Bana in style. It is not a translation of the Rasikajanamanobhirama, a Telugu work of his namesake, as remarked by certain scholars. Certain expressions in the work betray the Telugu origin of the poet".

In Public domain. Digitization Muthulakshmi Research Academy

तन्निरासनम्- रसिकजनमनोभिरामादिकृतीनां कर्त्ता कूचिमञ्चि तिम्मकविः पिठापुराधिपस्य माधवरायस्य (प्रथमः) (1656-1704) समकालिकः। संस्कृतरचनायाः सुजनमनःकुमुदचन्द्रिकायाः कर्ता कूचिमञ्चि तिम्मकविः पिठापुराधिपस्य नीलाद्रिरायस्य (क्रि.श. 1778-1828) समकालिकः।

2. **द्वितीयाभ्रान्तिः** – अयं रुक्मिणीपरिणयः राजशेखरविलासः नीला सुन्दरीपरिणयः, सारङ्गधरचरित्रम् रसिकजनमनोभिरामं कक्कुटेश्वर शतकं इत्यादिरचनाः नैकाः चकार। संस्कृतेन च सुजनमनः कुमुदचन्द्रिकेति काव्यं व्यरचयत्।

भ्रान्तिनिरासनम् - उपर्युल्लिखितानां कृतीनां कर्त्ता कूचिमञ्चि तिम्म कविः कूचिमञ्चिवंशे द्वितीयः पूरुषः। सुजनमनःकुमुदचन्द्रिकेति गद्य काव्यस्य कर्त्ता कूचिमञ्चि तिम्मकविः कूचिमञ्चिवंशस्य पञ्चमपूरुषः।

नामसादृश्यात् साहित्यविमर्शकाः स्वयं भ्रान्तिम् अनुभूय भ्रान्तिम् अकल्पयन् साहित्यलोके। तूमाटि दोणप्पवर्यः तादृशीं भ्रान्तिम् अपहाय सप्रमाणं तस्य जीवनवृत्तान्तं स्पष्टीकृतवान्। सुजनमनःकुमुदचन्द्रिकाकर्तुः कूचिमञ्चि तिम्मकवेः वंशवृक्षस्य विवरणं सुकविमनोरञ्जनम् इति लाक्षणिकग्रन्थे विस्तरेणोपलभ्यते।

कूचिमञ्चि वेङ्कटरायः – कूचिमञ्चि तिम्मकविपुत्रः - सुकविमनोरञ्जनग्रन्थकर्ता

दिष्ट्या कूचिमञ्चि तिम्मकवेः पुत्रः सुकविमनोरञ्जनम् इति प्रसिद्धस्य तेलुगुलाक्षणिकग्रन्थस्य कर्त्ता कूचिमञ्चि वेङ्कटरायः ग्रन्थस्य अवतारिकायां विपुलं स्ववंशवर्णनं चकार। शतेन श्लोकैः स्ववंशप्राशस्त्यम् अकीर्तयत्। स्ववंशपूर्वजानां कवीनां पण्डितानाञ्च घनकीर्तिं कृतिसम्पदञ्चाधिकृत्य पद्येषु

In Public domain. Digitization Muthulakshmi Research Academy

वर्णितवान्। (सुकविमनोरञ्जनम् – प्रथमाश्वासः 1-99 श्लोकाः) ग्रन्थमिमं श्रीमान् कोवेल सम्पत्कुमाराचार्यः परिष्कृत्य हैद्राबादनगरस्थ आन्ध्रप्रदेश साहित्य अकाडमी पक्षतः 1976 तमे वर्षे मुद्रापयामास। श्रीमान् आचार्यः वेङ्कटरायवंशवृक्षं तद्वंशप्राशस्त्यं साहित्यसेवां कृतिविमर्शनञ्च चकार।

कूचिमञ्चितिम्मकविवंशवृक्षः



In Public domain. Digitization Muthulakshmi Research Academy

तिम्मकविः (द्वितीयः)

कविरयं कूचिमञ्चिवंशे लोकप्रसिद्धः अभिनववागनुशासनः कविसार्वभौमश्चेति बिरुदाङ्कितः बहुग्रन्थप्रणेता चास्ति। जीवनचरमदशायां सन्न्यासाश्रमं स्वीकृत्य शिवरामतीर्थः इति नामान्तरं स्वीचकार। प्रकृत्या शैवोऽप्ययं शिवकेशवाभेदं प्रदर्शयति स्म। कृतिसन्तानेनानुगृहीतोऽयं कविः अपुत्रः आसीत्। कवेरस्य काश्चन प्रसिद्धाः तेलुगुकृतयः –

1. राजशेखरचरित्रम् 2. रुक्मिणीपरिणयः 3. नीलासुन्दरीपरिणयः
4. सिंहशैलमाहात्म्यम् 5. सप्तसागरचरित्रम् 6. सारङ्गधरचरित्रम्
7.अच्चतेलुगु रामायणम् 8. सर्पपुरमाहात्म्यम् 9.सर्वलक्षणसारसङ्ग्रहः
10. रसिकजनमनोभिरामः 11.श्रीशिवलीलाविलासः 12.श्रीकृष्णदण्डकम्

अन्यानि च शतककाव्यानि।

जग्गनः (द्वितीयः)

अयमपि अग्रजः तिम्मनः (द्वितीयः) इव कूचिमञ्चिवंशे प्रथितयशाः।

1.जानकीपरिणयः 2. नर्मदापरिणयः 3.राधाकथासुधानिदानम्
4. सुभद्रापरिणयः 5. उमासंहिता 6. चन्द्ररेखाविलापश्चेति

अस्य कृतयस्सन्ति। नैकशतककाव्यानि गीतप्रबन्धाः गद्यानि मञ्जर्यः चाटुपद्यानि च तेलुगुभाषया व्यरचयत् ।

गङ्गनः (द्वितीयः)

तारकब्रह्मरामायणम् (शतकण्ठरामायणम्) दण्डकानि शतकानि च अस्य कवेः रचनास्सन्ति।

तिम्मनः (पञ्चमः)

कविरयं संस्कृतेन सुजनमनःकुमुदचन्द्रिका चेति गद्यकाव्यं व्यरचयत्। काव्यमिदं बाणस्य कादम्बर्याः सुबन्धोः वासवदत्तायाः शैल्या विरचितमिति

In Public domain. Digitization Muthulakshmi Research Academy

तिम्मनस्य पुत्रः सुकविमनोरञ्जनमिति लाक्षणिकग्रन्थकर्त्ता वेङ्कटरायः ग्रन्थस्य अवतारिकायां वर्णितवान्[9]।

विद्यागुरुः – देवुलपल्लि सीतारामान्तर्वाणी

काव्यान्ते कविः स्वगुरुं देवुलपल्लि सीतारामान्तर्वाणिमहाशयं सस्मार। तस्य सकाशे शास्त्राण्यधीतवानिति सः पिठापुरसंस्थाने आस्थानकवि रिति च ज्ञायते[10]।

वेङ्कटरायः -

सुकविमनोरञ्जनमु इति तेलुगुलाक्षणिकग्रन्थस्य कर्ता तिम्मकवेः (पञ्चमः) पुत्रः वेङ्कटरायः। शालिवाहनशके 1794 तमे वर्षे (क्रिस्ताब्दे 1872) प्रजोत्पत्तिनाम संवत्सरे सुकविमनोरञ्जनमु इति ग्रन्थः लिखित इति कविना ग्रन्थान्ते उल्लिखितः। गोपिकाहृदयलोलशतकम् रामचन्द्रशतकम् चेति रचनाः अपि कवेः कृतयः इति कोवेल सम्पत्कुमाराचार्यः उल्लिखति।

सुजनमनःकुमुदचन्द्रिका – सरसहृत्कुमुदचन्द्रिका

प्राच्यलिखितग्रन्थालये या प्रतिः (R. No. 910-2) लभ्यते सा सरसहृत्कुमुदचन्द्रिका इति निर्दिष्टास्ति। आन्ध्रविश्वकलापरिषदः निकटे

---

[9] त्रैदशभाषाकाव्यमु
मोदमलर सरसहृत्कुमुदचन्द्रिक ना
नादग वासवदत्ता
कादम्बरुलेसग दिम्मकवि रचियिञ्चेन्। (सुकविमनोरञ्जनमु. आ.1.53)

[10] 'इति श्रीमत्कुक्कुटेश्वरप्रसादलब्धकवितासम्पादितयशस्सान्द्रेण ..... देवुलपल्लिकुलपयोनिधिराकासुधाकरस्य सकलविद्याकरस्य परमपवित्रविचित्र-तरवाणेः सीतारामान्तर्वाणेः छात्रेण तिम्मकविनामधेयेन विरचिता सजनमनः कुमुदचन्द्रिका नाम गद्यकाव्यं समाप्तम्।

In Public domain. Digitization Muthulakshmi Research Academy

विद्यमाने द्वे प्रती सुजनमनःकुमुदचन्द्रिका इति निर्दिष्टा। प्रथमा प्रतिः असमग्रा द्वितीया च समग्रेति विवरणमुपलभ्यते। सुजनमनःकुमुदचन्द्रिका रसिकजन मनोभिरामः इति ग्रन्थस्य संस्कृतानुवाद इति ग्रन्थालयेन विवरणं प्रदत्तमिति।

तेलङ्गाणाराज्यस्थप्राच्यलिखितग्रन्थालये संरक्षितः हस्तलिखितग्रन्थः (Acc No. 133/A, Call no. S5-237) समग्ररूपः ग्रन्थः देवनागरीलिप्या उपलभ्यमानः **सजनमनःकुमुदचन्द्रिका** इति निर्दिष्टोऽस्ति। कूचिमञ्चि तिम्मकविपुत्रस्तु सुकविमनोरञ्जनमिति स्वकृतौ स्वपितुः कूचिमञ्चि तिम्मकवेः रचना सरसहृत्कुमुदचन्द्रिका चेति निर्दिशति[11]।

काव्यशैली

काव्येऽस्मिन् उपशतं श्लोकाः सन्ति इत्यतः केचन साहित्यविमर्शकाः इदं चम्पूकाव्यमित्यभिप्रयन्ति। किन्तु सुजनमनःकुमुदचन्द्रिका गद्यकाव्यमिति बहिरङ्ग-अन्तरङ्गप्रमाणैश्च निरूप्यते।

पि. श्रीराममूर्ति 'Contribution of Andhra to Sanskrit Literature' इति ग्रन्थरचयिता क्रि.श. 1965 तमे वर्षे गुहवटीनगरे 22 तमे अखिलभारतीयप्राच्यविद्यासम्मेलने सुजनमनःकुमुदचन्द्रिका चेति शोधलेखं प्रास्तौत्। तत्र सःकाव्यमिदं गद्यशैल्या रचितमिति प्रमाणपुरस्सरं न्यरूपयदिति दोणप्पवर्यः प्रमाणत्वेन गद्यकाव्यमेवेति निरदिशत्।

अन्तरङ्गप्रमाणानि

काव्यादौ कविः मङ्गलाचरणं पद्यरूपेण विधाय ततः चूर्णिकाः इति उल्लिख्य काव्यं गद्यरूपेण आरभते। काव्यान्ते कविवचनानि अपि गद्यकाव्यमित्येव द्रढयन्ति।

---

[11] Infra- F N number 5

In Public domain. Digitization Muthulakshmi Research Academy

'इति श्रीमत्कुक्कुटेश्वर.....तिम्मकविनामधेयेन विरचिता सुजनमनःकुमुदचन्द्रिका नाम गद्यकाव्यं समाप्तम्'।

गद्यकाव्यम्

गद्यकाव्यस्य लक्षणानि साहित्यदर्पणे सम्यक् विवेचयति विश्वनाथः। कथावस्तु रोचकं स्यात्। गद्यशैली स्यात्। पद्यैः मङ्गलाचारणं कुर्यात्। आश्वास इत्यादिरूपेण गद्यकाव्यस्य विभागाः स्युः इति[12]।

इमानि लक्षणानि सुजनमनःकुमुदचन्द्रिकायां दरीदृश्यन्ते। कथावस्तु अतीव सरसमस्ति। पद्यैः काव्यादौ इष्टदेवतास्तुतिः विहिता। कथांशानां व्यवच्छेदस्तु लुप्तः।

गद्यकाव्यभेदाः

गद्यं कवीनां निकषं वदन्ति। इति काचित् उक्तिरस्ति। तच्च दण्ड्यादिभिः द्विधा विभक्तम्। कथा आख्यायिका चेति। अग्निपुराणे पञ्चधा विभक्तम्[13]। साहित्यदर्पणकारस्य मते दृश्यं श्रव्यञ्चेति काव्यं द्विविधं भवति। श्रव्यस्य पद्यं गद्यञ्चेति द्वौ भेदौ स्तः। पुनः गद्यं मुक्तकम्, वृत्तगन्धि, उत्कलिकाप्रायम्, चूर्णकम् चेति चतुर्विधम्[14]। तल्लक्षणान्यपि उल्लिखितानि।

---

[12] कथायां सरसं वस्तु गद्यैरेव विनिमितं ।।
क्वचिदत्र भवेदार्या क्वचिद्वक्त्रापवक्त्रके ।आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्तनं ।। आख्यायिका कथावत्स्यात्कवेर्वंशानुकीर्तनं। अस्यामन्यकवीनां च वृत्तं पद्यं क्वचित्कचित् ।
कथांशानां व्यवच्छेद आश्वास इति बध्यते ।आर्यावक्त्रापवक्त्राणां छन्दसा येन केनचित् अन्यापदेशेनाश्वासमुखे भाव्यर्थसूचनम् ।। (साहित्यदर्पणः 632-635)

[13] आख्यायिका कथा खण्डकथा परिकथा तथा
कथानिकेति मन्यन्ते गद्यकाव्यं च पञ्चधा।। (अग्निपुराणम् – 336 अ. 12)

[14] वृत्तगन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च।
भवेदुत्कलिकाप्रायं चूर्णकं च चतुर्विधम्। (साहित्यदर्पणः)

 In Public domain. Digitization Muthulakshmi Research Academy

आद्यं समासरहितं वत्तभागयुतं परम्।
अन्यद्दीर्घसमासाढ्यं तुर्य्यञ्चाल्पसमासकम्।।

अल्पसमासाढ्यं स्वकाव्यम् अतः चूर्णकमिति गद्यप्रभेदे अन्तर्भवतीति कवेरभिप्रायः।

इष्टदेवतास्तुतिः

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि चाऽध्येतारश्च प्रवक्तारो भवन्ति इति महाभाष्यकारवचनमनुसृत्य निर्विघ्नतया ग्रन्थपरिसमाप्तये कुलदेवस्य शिवस्य ततः पार्वत्याः लक्ष्मीपतेः विष्णोः विनायकस्य पण्डितसहृदयान् प्रपितामहं जग्गकवीश्वरं संस्तुत्य कुकविनिन्दाञ्च प्रस्तौति काव्यारम्भे तिम्मनकविः।

पात्राणि

1. कलिङ्गदेशीयः कुशलवर्तिनः सूनुः तपोधनः महाभागः
2. वेत्रधरः
3. इन्द्रः
4. केरलाधिपः सङ्गरोन्मुखः
5. आर्यहितनामकः मन्त्री
6. केरलस्य हेमवतीनगरनिवासी नायकः राजपुत्रः करालवक्रः
7. ताम्पूलकरण्डधरः कुसुमशेखरः
8. सुमुखो नाम तपोधनः
9. नायिका मञ्जरी (वासन्ती वसन्तनन्दिनी)
10. भिल्लजनाधिपः वसन्तः मञ्जर्याः पिता
11. कलिका वसन्तस्य पत्नी मञ्जर्याः जननी
12. सनालिका वसन्तस्य माता मञ्जर्याः पितामही

In Public domain. Digitization Muthulakshmi Research Academy

13. शुकः
14. चतुरवाणी मञ्जर्याः सखी
15. कलहंसी
16. कलहंसः नाथहतकः
17. शारिका कलहाशिनी
18. अनङ्गनामकः शुकः
19. पुण्यभेदिनः असुरस्य पुत्रः योगिभिदाख्यः असुरपुत्रः
20. चत्वारः असुराः
21. यमकिङ्करौ, प्रमथगणाः
22. यमः
23. परमेश्वरः

वर्णनानि

हिमाचलाटवी दिव्यनदी चन्द्रः चन्द्रिका चण्डिका सूर्योदयः अमरावतीनगरम् इन्द्रसभा नन्दनवनम् वसन्तर्तुः वनं प्रति प्रस्थानम् हिमगिरिः सरोवरः स्नानवर्णनम् सुमुखस्य तपोधनस्य वर्णनम् हितोपदेशः मञ्जरी पूजाकारकः मञ्जरीविरहः शिशिरोपचारः सूर्यः राजनिकेतनम् सूर्यास्तमयः सन्ध्यारागः नक्षत्राणि युद्धम् पुण्यवनम् विमानम् नरकम् शिवमहिमा इत्यादीनि प्रधानतया कविना वर्णितानि। कविसमयस्य चातुरी अतीव मनोहरीति अनुभूयते। विशिष्य प्रकृतिवर्णनं कवेः कोमलहृदयम् आविष्करोति। काव्यस्यास्य पठनावसरे बाणस्य कादम्बरी सुबन्धोः वासवदत्ता चेति काव्यद्वयं सहृदयहृदयः संस्मरति। सुमुखो नाम तपोधनेन कृतः उपदेशः कादम्बर्याः शुकनासोपदेशेन साम्यं भजति।

 In Public domain. Digitization Muthulakshmi Research Academy

"आकरस्सकलदोषाणाम् उदयो यौवनस्य पावकमिव पवनः प्रेरयति लक्ष्मीमदो यौवनं राज्यलक्ष्मीमदश्चेत्किमुत अनिर्वाच्यमेव गर्भैश्वर्यं चेत् अत्युत्कटैश्वर्य-यौवनमदान्धेन अदृश्यते ..... विजितेन्द्रियाणां महतां मनः तपोधनानामपि प्रचलीकर्तुं भवति समर्थमेकैकं प्रत्येकमेव पुष्पवनपवनशुकपिकचन्द्रादीनाम् धनयौवनमदान्धानामवनी-पतीनामेतेषामरिष्टकारीति किमुतायं समुदायः विद्वज्जननिन्दितेषु मृगयाक्षपानादिषु आसक्तमनुसरति पुरुषमङ्गनामोहस्सहचरत्वात्।[15]"

कथावस्तु

दिव्यादिव्यपात्रसमेतं श्रृङ्गाररसाढ्यं कथावस्तुविलसितमिदं काव्यं वस्तुतः शिवपारम्यबोधकमस्ति।

कथासारः-

उत्तरदिशि हिमाचलाटवी अस्ति। तस्याः मध्यभागे भगवता शिवेन अधिष्ठितः कनकप्रासादः विराजते। तन्निकटे दिव्यनदी विलसति। तपोधनाः प्रासादे तदन्तिकलतागृहेषु निवासं चक्रुः। तपोधनार्धं कलिङ्गदेशात् कुशलवर्तिनः पुत्रः ब्राह्मणकुलावतंसः महाभागो नाम तां नदीम् अद्राक्षीत्। तस्यां कृतस्नानः हेमालयं ददर्श। निवासयोग्यं स्थलमिति निश्चित्य तत्रैवोवास। नित्यम् उमाम् उमापतिञ्च आराधयति स्म। अमरावतीनगर वीक्षणाय मतिं चकार सः। उच्चैःश्रवसम् अश्वराजं ददर्श। द्वारमासाद्य वेत्रधरमवोचत्। महाभागो नाम तपोधनः इन्द्रदर्शनाय आगत इति वेत्रधरमुखेन इन्द्रं प्रति सन्देशम् अप्रेषयत्। झटिति इन्द्रः सभायाः निर्गत्य महाभागम् अभ्येत्य पुरस्कृतवान्। नन्दनवनं संवीक्ष्य इन्द्रनिर्दिष्टं पशुपतिभवनमधिगम्य भगवतः

---

[15] सुजनमनःकुमुदचन्द्रिका।। पुटसङ्ख्या 29

In Public domain. Digitization Muthulakshmi Research Academy

पूजां विधाय इन्द्रस्यातिथ्यं स्वीकृत्य प्रतिपदगलद्रसममलतरं वृत्तान्तं कथयेति पृष्टवति इन्द्रे महाभागः कथां वक्तुमारभत।

महाभागोक्तकथा

केरले सङ्गरोन्मुखः नाम राजा मन्त्रिणः आर्यहितनामधेयस्य साहाय्येन राज्यं शशास। कदाचित् मन्त्रिणमाहूय करालवक्त्रो नाम मदीयं पुत्रं अनुदितयौवनोदयं रक्षतु इति प्रार्थयित्वा वैकुण्ठमगात्। मन्त्रिणः मार्गदर्शनेन अधिगतसर्वशास्त्रः यौवनदशामापन्नः करालवक्त्रः। कदाचित् कुसुमशेखरो नाम ताम्बूलकरण्डधरः मृगयाविनोदार्थं राजपुत्रं प्रेरयामास। मृगयापरिश्रन्तः करालवक्त्रः सरोवरं गत्वा कृतस्नानः रसालतरुच्छायायां यदा कुसुमशेखरद्वितीयः निषण्णः तदा सुमुखो नाम तपोधनः तस्मिन् सरोवरे कृतस्नानसन्ध्याविधिः राजपुत्रं वीक्ष्य तत्परिचयं प्राप्य हितमबोधयत्। यौवनम् ऐश्वर्यम् अधिकारः अज्ञानम् चेति चतुष्टयं पुरुषपतनहेतुरिति कामविकार जनकभिल्लकान्तामयारण्यमिदं त्यक्त्वा मदुपदेशं भज इत्युक्त्वा ततः निर्गतः। अचिरेण तत्र आगतां हरिणीं विलोक्य तद्ग्रहणेच्छया तमनुससार राजसूनुः। तत्प्रसङ्गे लावण्यवतीं रमणीं काञ्चित् दृष्ट्वा कुतुकेन तस्याः विवरणम् अपृच्छत्। प्रथमं तावत् भवत्परिचयं देहीति पृष्टवत्यां तस्यां राजपुत्रः स्वपरिचयं प्रास्तौत्।

विदितराजपुत्रवृत्तान्ता सा कान्ता स्ववृत्तान्तं कथयामास। वसन्तो नाम महाबलः समस्तभिल्लजनानामधिपतिः दन्तखेटनाम्नः पुत्रीं कलिकेत्यभिख्यां परिणीतवान्। सन्तानराहित्यात् खिन्नः सः कलिकाद्वितीयः मातुः सनालिकाभिख्यायाः अनुमत्या भवानीम् अर्चयामास। लब्धदेवीप्रसादः वसन्तः मञ्जरीति कन्यारत्नेन अनुगृहीतः। प्राप्तयौवनायाः मञ्जर्याः योग्यवरान्वेषणे विफलः वसन्तः भिल्लनायकः किंकर्तव्यताविमूढः आसीत्। साहं मञ्जरी उपवने क्रीडन्त्याः बालहरिण्याः ग्रहणेच्छया चिरं सञ्चारं कृत्वा

 In Public domain. Digitization Muthulakshmi Research Academy

आयासमनुभवामि। सैव बालहरिणी युष्माकमपि मोहदायिनी जातेति विशेष इति उक्त्वा सा वाग्व्यापारात् विरराम।

इतःपूर्वमेव श्रुतं मुनिहितोपदेशम् उपेक्ष्य स राजसूनुः स्वानुरागं यावत् प्रकटीचकार तावत् मञ्जर्याः सखी काचित् तत्रागत्य तज्जननीवाक्येन मञ्जरीं तस्मान्निवर्तयामास। करालवक्रे निहितदृष्टिः सा मञ्जरी ततः दुःखेन निर्गता। मञ्जरीविरहतप्तः राजपुत्रः कुसुमशेखरस्य साहाय्येन स्वनिकेतनं प्राप्य भृशं विललाप। पटगृहद्वारतलस्थितं शुकं वीक्ष्य कुसुमशेखरः राजपुत्रं निवेदयामास। स च कीरः प्रभोः शय्यातलमगात्।

राजपुत्रः मञ्जर्याः समीपादागतं शुकं वीक्ष्य प्रमुदितमनाः जातः। शुकमुखात् मञ्जरीविरहावस्थां विदित्वा शुकनिर्दिष्टं पूर्वतनं प्रियासङ्गमस्थानं प्राप। सखीजनपरिवृता मञ्जरी वितानपटान्तरालविरचितं शय्यागृहोपेतं प्रभुनिकेतनम् आससाद। कलिकासुता मञ्जरीयं पाल्यतामिति तत्सखीभिः प्रार्थितः नरपतिः मञ्जरीसाङ्गत्यमभजत। परिहृत्य राज्यलक्ष्मीम् अत्रैव मञ्जर्या सह दिवसान् यापयामास।

कदाचित् वधूकरं गृहीत्वा स्वनिवासान्निर्गत्य उपवने विहरन् चतुर्भिः असुरैः अनुगम्यमानं भीकरं पुण्यभेदिनः पुत्रं योगिभिदाख्यम् असुरनायकं ददर्श। तुमुले युद्धे असुरं पराजित्य करालवक्रः स्वगृहं जगाम। ततः मृगमेकं विलोक्य तद्ग्रहणेच्छया तमनुससार। मृगानुसारी राजा किञ्चन पुण्यकाननं ददर्श। तत्रत्यानां क्रूरमृगाणां सात्त्विकप्रवृत्तिं विलोक्य चकितचकितोऽभूत्। तमनुसृत्य आगतवतीं मञ्जरीं पुण्यकाननसौन्दर्यं दर्शयामास। शाखाम् अधिष्ठितं राज्ञा दर्शितं शुकपोतं स्पृहयामास मञ्जरी। मञ्जर्याः अनुरोधात् अगतिकः राजा शुकग्रहणतत्परोऽभूत्। उपसर्पन्तं राजानं वीक्ष्य शाखान्तरं

In Public domain. Digitization Muthulakshmi Research Academy

ततः वृक्षान्तरं जगाम आत्मरक्षणतत्परः शुकः। तथापि स्वनिकटमागतवति राज्ञि शुकः पुरा स्थितं पुरातनपुरारिप्राकारमगात्। क्षणं तत्र स्थित्वा भीतभीतः स शुकपोतः महेश्वरस्य प्रासादशृङ्गं प्राप। तद्ग्रहणलालसमानसः राजापि प्रासादशृङ्गम् आससाद। प्रासादस्य प्रदक्षिणं विधाय आरोहणार्थम् अनुकूलमार्गम् अवलोकयन् ध्वजस्तम्भस्य मूले क्षणम् उपविश्य तदधिरुह्य पुरुषषड्रमाणं ईशानदिशि रचितबलीवर्दविषाणाग्रं गृहीत्वा सव्येतरेण हस्तेन शुकग्रहणाय प्रसारयति पादं राजनि शृङ्गाग्रः भग्नः जातः। हा शङ्कर शूलहस्त इति उदीरयन् अधः पपात प्राणानपि मुमोच स राजपुत्रः ।

अनुक्षणं यमकिङ्करौ तम् आदाय ताडयन्तौ क्रोशद्वयं निन्यतुः। शूलहस्ताभ्यां भस्मविलिप्तपुराभ्यां प्रमदाभ्यां गन्धर्वतरुणीभिः समुज्ज्वलं दिव्यविमानम् अद्राक्षीत् स राजा। किङ्करयुगं जित्वा राजपुत्रं मोचयित्वा आत्मपुरः सन्निधाय नन्दिनं प्रमथयोः विमानं कैलासाभिमुखम् अभवत्।

मार्गे पापान् क्रूरं दण्डयतः यमस्य दर्शनं चकार अवनीशः। कैलासं प्राप्य जगदीश्वरस्य चरणयुगलं प्रणम्य श्लोकाष्टकेन स्तुतिं चकार।

महेशः तं समीपे उपवेश्य वत्स प्राणत्यागसमये मन्नामोच्चारणं कृतवति त्वयि प्रसन्नोऽस्मि। त्वद्विरचितश्लोकाष्टं यः पठेत् स विगतकल्मषो भवतीति उक्तवति महेशे किङ्करैः सरयमागत्य यमः महेशचरणयोः पपात। महेशञ्च निवेदयामास यमः यत् दोषकलुषितोयं राजा राज्यं विहाय मृगयासक्तः सन् अरण्यमाश्रित्य हीनकुलजायाम् अनुरक्तः तत्सङ्गममवाप्य अशनवसनादिकमपि उपभुज्य युक्तायुक्तविवेकशून्यः शुकग्रहणलोलुपः प्रासादात् पपात। मत्किङ्कराभ्यां गृहीतोऽयं पापः त्वत्प्रमदाभ्यां विमुक्तः कैलासं प्रति आनीतश्च। चित्रगुप्तमुखात् करालवक्त्रव्यापारं श्रवणगोचरं कुरु इति

In Public domain. Digitization Muthulakshmi Research Academy

प्रार्थितवति यमे महेशः तमुवाच। त्वदुक्तं सत्यमेव। तथापि मम प्रासादस्य प्रदक्षिणेन विगतकल्मषः जातः। प्राणपरित्यागसमये मन्नामद्वयं अनेन स्मृतम्। य गोविन्द अथवा शिव इति भगवन्नामस्मरणं करोति सोऽकल्मष भवतीति यमं सत्कृत्य आत्मनिलयं प्रेषयामास। ततः महिषवाहनम् अधिरुह्य यमः स्वनिकेतनं प्राप।

श्रुण्वन्ति ये पुण्यकथां मयोक्तां पठन्ति तेषां सफला भवन्तु।
कैलासनाथस्य कृपाभिवृद्धेः मनोरथा वासवभक्तियुक्ता।।

इति कथाम् इन्द्रं श्रावयित्वा तपोधनः महाभागः उदयगिरिम् आरूढवति सवितरि मन्दाकिन्यां कृतसन्ध्याद्यनुष्ठानकलापः कदाचित् सत्यलोकं कदाचित् वैकुण्ठं कदाचित् कैलासम् अवलोकयन् दीव्यति स्म।

काव्यप्रयोजनम्

सुजनमनःकुमुदचन्द्रिकेति गद्यकाव्यं कान्तासम्मितं सत् चतुर्वर्गफल दायकम् अस्ति। लोकोत्तरवर्णनानिपुणः कूचिमञ्चि तिम्मकविः श्रृङ्गाररसाढ्यं कथावस्तु आदाय कान्तासम्मिततया सहृदयम् अभिमुखीकृत्य शिवपारम्यम् उपदिशति। काव्यमुपदेशयुजे इति मम्मटवचनं[16] काव्यं चतुर्वर्गफलायत्तमिति काव्यालङ्कारकर्तुः भामहस्य वचनम्[17] अत्र प्रमाणम्।

---

[16] काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ।। 2 ।।
कालिदासानादीनामिव यशः श्रीहर्षादेर्धावकादीनामिव धनं राजादिगतोचिताचारपरिज्ञानम् आदित्यादेर्मयूरादीनामिवानर्थनिवारणम् सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलिदवेद्यान्तरमानन्दम् प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत् काव्यं लोकोत्तरवर्णनानिपुणकविकर्म तत् कान्तेव सरसतापादनेनाभिमुखीकृत्य

शैवमतानुयायी तिम्मकविः

कविः महेशम् उमाम् आन्तं काव्यं स्तौति। काव्यान्ते कक्कुटेश्वरं संस्मरति।[18] प्रमाणैरेतैः तिम्मकविः शैवमतानुयायीति वक्तुं शक्यते।

प्रायः कूचिमञ्चिवंशजाः सर्वे कुक्कुटेश्वरभक्ताः। कुक्कुटेश्वराय स्वकृतिसमर्पणं चक्रुः। कूचिमञ्चि तिम्मकविः (द्वितीयः) कुक्कुटेश्वरशतकं व्यरचयत्। **भूनुतविलास पीठिकापुरनिवास कुमुदहितकोटिसंकाश कक्कुटेश** इति मकुटसहितमिदं शतककाव्यम्। कूचिमञ्चि वेङ्कटरायः सुकविमनोरञ्जनस्य अवतारिकायां कुक्कुटलिङ्गविभुं तुष्टाव।[19]

कक्कुटेश्वरः- तूर्पुगोदावरीजनपदे लोकप्रसिद्धिं गते पिठापुरसंस्थाने कक्कुटेश्वरालयः विराजते। त्रिगयाक्षेत्रेषु अन्यतमः। पादगयाक्षेत्रमिति अस्य व्यवहारः। कुक्कुटेश्वरः देवालयस्य प्रधानः देवः। अत्रत्यः स्वयम्भूलिङ्गः कुक्कुटेश्वरनाम्ना प्रसिद्धः। कुक्कुटो नाम पक्षिविशेषः। कृतयुगे गयासुरो नाम दानवराजः आसीत्। सञ्चितपुण्यकर्मवशात् स इन्द्रपदं प्राप्तवान्। पदच्युतः इन्द्रः त्रिमूर्तीन् प्रार्थयत्। तस्य प्रार्थनाम् अङ्गीकृत्य त्रिमूर्तयः ब्राह्मणवेषेण गयासुरम् उपगम्य यज्ञनिर्वहणाय स्थलं प्रार्थयन्। गयासुरः स्वशरीरमेव

रामादिवद्वर्तितव्यं न रावणादिवदित्युपदेशं च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम्।।

[17] धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
प्रीतिं करोति कीर्तिं च साधुकाव्यनिबन्धनम् ।। १.२ ।। भामहस्य काव्यालङ्कारः

[18] श्रीमत्कुक्कुटेश्वरप्रसादलब्धकवितासम्पादितयशस्सान्द्रेण .....तिम्मकविनामधेयेन विरचिता सुजनमनःकुमुदचन्द्रिका नाम गद्यकाव्यं समाप्तम्।

[19] श्रीमहिलाधिनाथ सरसीरुहजात शचीकलत्रमुख्यामरसार्वभोम मकुटामितरत्नविभाझरीपरी षामलपादपद्मु महिकांशुकिरीटु धर्मात्मजामिलत्कोमलमूर्ति पीठपुर कक्कुटलिङ्गविभुं दलञ्चेदन्।। सु.म.र. प्र.आ. 1

In Public domain. Digitization Muthulakshmi Research Academy

समर्पितवान्। यज्ञः प्रातः कक्कुटरवेण आरब्धः। यज्ञभङ्गाय शिवः कुक्कुटरूपं धृत्वा कुक्कुटरवं चकार। तच्छ्रुत्वा यज्ञः परिसमाप्त इति भ्रान्त्या शरीरं कम्पयामास गयासुरः। यज्ञभङ्गः विहितः इत्यतः गयासुरः संहरणीयः इति त्रिमूर्तिभिः निश्चितः। तदङ्गीकृत्य गयासुरः स्वशरीरस्य त्रयः खण्डाः दिव्यक्षेत्रत्वेन परिवर्तितास्स्युः इति प्रार्थयत्। शिरोभागे विष्णुः नाभिदेशे ब्रह्मा पादतले कुक्कुटरूपधारी शिवः च आविर्भूताः। शिरोगया बीहारराष्ट्रे गयाक्षेत्रे नाभिगया ओढ्रराज्ये जाजपुररेलस्थानके पादगया तूर्पुगोदावरीजनपदे पिठापुरे च विराजन्ते। कुक्कुटेश्वरालये विराजमाना पुरुहूतिकादेवीति व्यवह्रियमाणा भवानी समाराध्यते। अष्टादश शक्तिपीठेषु दशमं पीठमिति उच्यते[20]।

कुक्कुटेश्वरशतकम्

कूचिमञ्चितिम्मकविः (द्वितीयः) भार्यावियोगानन्तरं सन्न्यासाश्रमं स्वीकृत्य कुक्कुटेश्वरशतकं व्यरचयदिति वेङ्कटरायग्रन्थे उल्लिखितः। कक्कुटेश्वरालये एव शेषजीवनं यापितवानिति ज्ञायते।

पिठापुरम्

पिष्टपुरम् पीठिकापुरमिति साहित्ये निर्दिश्यमानमिदं पुरम् अति प्रसिद्धं संस्थानमस्ति यस्य शासकाः कविपण्डितपोषका आसन् । ते सर्वथा

---

[20] अष्टादश शक्तिपीठानि - लडकायाम् शांकरीदेवी कामाक्षी काञ्चिकापुरे ।प्रद्युम्ने शुङ्खला देवी चामुण्डा क्रौञ्चपट्टणे ॥अलम्पुरे जोगुलाम्बा श्रीशैले भ्रमराम्बिका ।कोल्हापुरे महलक्ष्मीमाहुर्यमेकवीरिका ॥ उज्जयिन्याम् महाकाली पीठिकायाम् पुरुहूतिका ओढ्यायाम् गिरिजादेवी माणिक्या दक्षवाटिके।। हरिक्षेत्रे कामरूपी प्रयागे माधवेश्वरी। ज्वालायां वैष्णवीदेवी गयायाम् माङ्गल्यगौरिके।। वारणस्याम् विशालाक्षी काश्मीरेतु सरस्वती । अष्टादशैव पीठानि योगिनामपि दुर्लभानिच ॥ सायंकालं पठेन्नित्यम् सर्वरोगनिवारणम् । सर्वपापहरं दिव्यं सर्वसम्पत्करं शुभम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

कूचिमञ्चि कविपण्डितान् सत्कारं चक्रुः। कूचिमञ्चि तिम्मकविः (द्वितीयः) कविसार्वभौम नवीनशब्दानुशासन इत्यादिभिः बिरुदप्रदानैः सत्कृतः[21]। कूचिमञ्चि वेङ्कटरायः सुकविमनोरञ्जनमु इति तेलुगुलाक्षणिकग्रन्थे पीठिकापुरसंस्थानं वर्णयामास। विस्तरभयात् पिठापुरसंस्थानस्य तच्छासकानाञ्च विवरणमत्र न दीयते।

मतसामरस्यम्

यद्यपि कविः शैवः तथापि शिवकेशवयोरभेदं पश्यति। काव्ये यत्र शिवकीर्तनं करोति तत्र केशवनामसंस्मरणमपि करोतीति विशेषः।

परमेश्वरमुखात् मतसामरस्यपरकाणि वचनानि काव्यान्ते उदीरयामास कविः। "यो जनः शिव भव महादेवोत्युदीरयन् हरि मुकुन्द मुरारे अच्युतेति नामपठनतत्परः दिवारात्रं गमयति भस्मरेखाञ्चितफालः सदा ऊर्ध्वपुण्ड्रलसल्ललाटः स्फटिकाक्षमालावृतगलः तुलसीबीजाक्षराजत्कन्धरः बिल्वमहीरुहप्रदक्षिणरतिः सेविताश्वत्थः श्रीफलदलाञ्चन्मौलिः तुलसीपत्रोल्लसदुत्तमाङ्गः सोऽकल्मषः ...."

छन्दःप्रयोगवैशिष्ट्यम्

इन्द्रवज्रा उपेन्द्रवज्रा शार्दूलविक्रीडितं मालिनी अनुष्टुप् मन्दाक्रान्ता द्रुतविलम्बितादिवृत्तैः पद्यैः देवतास्तुतिपरकैः विलसितमिदं गद्यकाव्यम्। इन्द्रवज्रोपेन्द्रवज्राभ्यां वृत्ताभ्यां अधिकतया श्लोकाः ग्रथिताः। काव्यान्ते वृत्तविवरणसहिता पद्यसूची प्रदत्तास्ति।

---

[21] श्रीपीठिकानगरीपतिरावु

नीलाद्रिमाधवमहाराजदत्तकविसार्वभौमविख्यातबिरुदभासमानुडु.....सकलकविव रुलु नवीनशब्दशासनुण्डटञ्चुनु गोनियाडुचुण्डु कतन दिम्मकविसार्वभौमुन किम्महीतलमुन निदियु नोक बिरुदु सार्थमुगदनरे।। सुकवि.म. अवतारिका. 28

In Public domain. Digitization Muthulakshmi Research Academy

अलङ्कारवैचित्री

आन्तं काव्यं प्रकृतिवर्णनभूयिष्ठमस्ति। रमणीयप्रकृतेः वर्णनाय कविः शब्दालङ्कारान् अर्थालङ्कारान् प्रयुक्तवान्। दिङ्मात्रमुदाह्रियते।

मालोपमा यदेकस्योपमानं बहु दृश्यते इति विश्वनाथस्य साहित्यदर्पणानुसारं एकस्य दिव्यनदीति उपमेयस्य कविता वैकुण्ठनगरी अमरावती चिरण्टी लङ्का द्यौरित्यादीनि नैकानि उपमानानि कविना प्रयुक्तानि इत्यतः अत्र मालोपमा।

'तस्य प्रासादस्य समीपे...महाकविरचितकवितेव रसोज्ज्वला वैकुण्ठनगरीव पद्मालया अमरावतीव हरिसेविता चिरण्टीव वेणीविराजिता मत्तकाशिनीनेत्रश्रीरिव अञ्जनोद्भासिता लङ्केव पुण्यजनसेविता दिनकरोदयवेलेव तमोनाशिनी द्यौरिव चरत्पतङ्गा तर्कवाणीव शितिकण्ठा-लङ्कृता व्याकरणसूत्रसमितिरिव वररुचिविराजिता...दिव्यनदी बभूव '

प्रयोगवैचित्री

स्वव्याकरणपाण्डितीप्रकर्षेण सुचारुप्रयोगान् कृत्वा काव्यं सहृदयहृदयकारि चकार कविः।

सतिसप्तमीप्रयोगः

अथ उदयगिरिमहीपतेः.....लसमाने शशधरे निशामुखे सङ्केतमहीतलानि गतासु सुरपतिमणिप्रभाभासमानवसनावकुण्ठनास्वभि-सारिकासु विलीनेषु मधुकरेषु कञ्जातपुञ्जमुकुलेषु गतेषु दिङ्मुखानि प्रियवियोगदुःखानलपरितप्यमानमानसेषु...रराज कुमुदराजः।

रसनिरूपणम् - श्रृङ्गाररसाढ्यं गद्यकाव्यमिदमिति निरूप्यते। नाट्यशास्त्रोक्तप्रकारेण नवरसास्सन्ति। श्रृङ्गारहास्यकरुणरौद्रवीरभयानक

बीभत्साद्भुताः चेत्यष्टौ रसा स्मृताः।[22] करुणोऽपि रसः स्मृतः इति अभिनवगुप्तेन प्रतिपादितः।

विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः इति नाट्यशास्त्रस्य मतम्। श्रृङ्गाररसस्य रतिः स्थायीभावः। ऋतुमाल्यानुलेपनादिभिः विभावैः सम्भोगश्रृङ्गारः उत्पद्यते। विप्रलम्भश्रृङ्गारस्तु निर्वेदग्लानिशङ्कादिभिः विभावैरुत्पद्यते।

नायकः करालवक्रः नायिका मञ्जरी च आलम्बनविभावे अन्तर्भवतः। उपवनम् उद्दीपनविभावे अन्तर्भवति। नायिकानायकयोः प्रथमदर्शनसमनन्तरं तयोर्वियोगः जातः। तदा विप्रलम्बश्रृङ्गारः कविना पोषितः। यदा तयोस्सङ्गमः जातः तदा सम्भोगश्रृङ्गारः कविना निवेशितः। नायिकानायकयोः रतिक्रीडाकलापः हृदयङ्गमरूपेण अभिवर्णितः। काव्यान्ते नायकः कैलासं प्राप्तः। तस्य शिवभक्तिः प्रशंसिता। मोक्षः नायकेन अधिगतः इति कविः अभिवर्णयति। अतो अत्र शान्तरसोपि पोषितः कविना। नायकासुरयोर्मध्ये प्रवृत्तं युद्धं वीररसान्वितमस्ति। श्रृङ्गाररसः अङ्गीरसः शान्तरसः वीररसश्च अङ्गरसौ चेति वक्तुं शक्यते।

कार्तज्ञ्यसमर्पणम्

सुजनमनःकुमुदचन्द्रिका इति हस्तलिखितमातृकाग्रन्थः तेलङ्गाणा सर्वकारीयप्राच्यलिखितग्रन्थालयः परिशोधनालयश्च इति संस्थायाः सम्प्राप्तः। मातृकाग्रन्थस्य प्रतिं प्रदाय निस्तुलमुपकृतवद्भ्यः उपर्युल्लिखितस्य कार्यालयस्य निदेशकमहाभागेभ्यः डॉ. पि. सुब्बारावर्यभ्यः सस्नेहं कृतज्ञतां निवेदयामि। यस्य प्रचोदनेन मातृकाग्रन्थस्य सम्पादने आमुखलेखने च साफल्यं प्राप्तं तस्मै संस्कृत अकाडमी कार्यालयस्य निदेशकाय प्राचार्याय के.नीलकण्ठमहाभागाय सविनयं कार्तज्ञ्यं समर्पयामि। आमुखलेखने साहाय्यम् आचरितवतः विदुषः

---

[22] श्रृङ्गारहास्यकरुणा रौद्रवीरभयानकाः ।
बीभत्साद्भुतसन्ज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥ ना.शा. १५॥

In Public domain. Digitization Muthulakshmi Research Academy

जोशी भरद्वाजस्य अभिवृद्धिं कामयमानाऽहं तम् अभिनन्दामि। मातृकाग्रन्थस्य क्लिष्टम् उट्टङ्कनकार्यम् अङ्गीकृत्य माम् उपकुतवत्यै श्रीमत्यै श्रीदेवीवर्यायै कृतज्ञतां समर्पयामि। उस्मानिया विश्वविद्यालयस्य उपकुलपतिभ्यः प्राचार्येभ्यः डि. रवीन्दरमहाभागेभ्यः केन्द्रीयसंस्कृत-विश्वविद्यालयस्य उपकुलपतिभ्यः श्रीनिवासवरखेडिमहोदयेभ्यश्च कार्तज्ञ्यम् आविष्करोमि।

इति बुधजनविधेया
डॉ के. वरलक्ष्मीः
उपनिदेशिका

In Public domain. Digitization Muthulakshmi Research Academy

श्रीः

सुजनमनःकुमुदचन्द्रिका ॥

गौरीकुचद्वन्द्वविलिप्तचन्द्रश्रीचन्दनोद्भासितचारुमध्यः ।
मह्यं ददातु प्रसृतैः कटाक्षैः श्रेयांसि राजार्धलसत्किरीटः॥१॥

आर्यां प्रसार्य दोर्युगलं पतिमालिङ्गनेच्छया कुपिताम् ।
हारफणिफणमणौ स्वां वरानुनीतां विलोक्य वन्देऽहम् ॥२॥

स जयति कमलानाथः कपोललोचनललाटफलके यः ।
विरचितमृगमदकज्जलसिन्दूरलसदधरो लक्ष्म्याः ॥३॥

स पातु मत्काव्यमिभेन्द्रवक्त्रः करोति यो बालतया जनन्याः।
स्तनं पिबन्नेकमथ द्वितीये स्तने मुदं हस्तविलोडनेन ॥४॥

स्रवदमलरसमरन्दां घनगुणसङ्घटितसुपदमुकुलां मे ।
कवितामालां पण्डितहृदयमिलिन्दा भजन्तु पीतरसाः ॥५॥

प्रपितामहमहमहर खिल सुकविविनुतकविताढ्यं मे ।
जग्गकवीश्वरमनुजं सुजनस्य नमामि तिम्मकविराजः ॥६॥

इतरार्थतत्पुराणां सुकृतिस्थलदूषणात्मनां तु मम ।
कविताज्योत्स्नामनसां न ददाति मुदं हि कुकविचोराणाम् ॥७॥

गुणेगुणे दोषलवस्य दुष्टो विलोकनं काम्यति युक्तमेतत् ।
वने वने गन्धिलपुष्पगन्धे शवस्य गन्धं खलु वाञ्छति श्वा ॥८॥

In Public domain. Digitization Muthulakshmi Research Academy

चूर्णिकाः ॥

अस्ति मदहस्तिहस्तप्रोद्धूयमानमहीरुहकुसुमनिकरपतितमरन्दबिन्दुसन्दोहमिलितगजदानप्रवाहकर्दमिताखिलभूप्रदेशा, परस्परविरोधसङ्घट्टनमहिषविषाणजर्झरितलतावलीसमाक्रान्ता, सङ्गरोन्मुखमहोक्षखुरपुटपटलसमुद्घातप्रोद्धूतावनीरेणुधूसरितशाखिशाखाकुला, फणिफणामण्डलमण्डनमणिगणकिरण प्रोद्दीपितसहस्रकरकररहितगुहान्तरालनिद्रितसिंहभेदनोत्सुक किरातकरातिशातहेतिच्छटाविद्युद्विराजिताः, मृगयाविनोदसमागतयोधा मरुत्प्रचलिततरुकिसलयैराह्वयन्तीव कुसुमासवप्रलुब्धालिकुलझङ्कारैः सम्भाषयतीव स्थिता प्रदेशेऽस्मिन् करीन्द्रमदजलनिर्झरान् मकरन्दबिन्दुसन्दोहदुर्गममार्गान् इतः प्रचुरितानीवोल्लसितानि मुक्ताफलानि सिंहनखपतितानि भुवो रत्नगर्भात्वम् इतश्शुकमिथुनालापरम्योद्यानतरुसमूहान् इतः कर्पूरकदलीपरागान् इतः परिणतक्रीडागलितगजदन्तपङ्क्तिस्तत्र प्रकोकिलकाकलीकलरवकलितसहकारान्विलोकयतेति पतिभिः मुग्धभिल्लसुन्दरीभ्यः प्रदत्तमधुरवचनरचनविलसितानेकचन्दनतरुवीथिका-

अपि च ॥

कैलासनगरीव नर्तितनीलकण्ठरवाक्रान्ता, सुरपतिसभास्थलीव रम्भाहरिणीविलासभासुरा सुमनोविलसिता च, महाराजराज्यलक्ष्मीरिव सत्कविसमूहसंसेविता, वाराङ्गनावासभूरिव भुजङ्गकलापसंश्रिता, सत्कविरचितकवितेव शार्दूलाडम्बरप्रकाशिता मत्तकोकिलविराजिता

In Public domain. Digitization Muthulakshmi Research Academy

च, सामन्तभवनश्रीरिव काञ्चनप्रभाञ्चिता, श्रीकृष्णमूर्तिरिव तमालश्यामला, नन्दनवनलक्ष्मीरिव हरिचन्दनामोदघुमुघुमायमाना, भागवतकथेव शुकालापरम्या ललनागात्रयष्टिरिव पुष्पलताभिरामा, महामहीरमणदेहलीव खड्गजालभीकरा, पञ्चाननाधिष्ठितापि मदनबलविराजिता आश्रितचण्डाल्यपि द्विजकुलनिवासयोग्या आमोदितसन्मार्गप्रचारापि दुर्मार्गसहिता हिमाचलाटवी दिश्युत्तरस्याम्। यस्यामर्जुनतरुशाखाग्रलग्नलताकुसुमेषु भ्राम्यद्भिरेफकदम्बैः पुण्डरीक भ्रान्त्या निशायामागतश्चन्द्रः कुरङ्गलाञ्छनच्छलेन दृश्यमानस्सन् नैल्यमुरसा बिभर्ति।

यस्यां महीरुहशाखान्तरालनटत्कलापिकलापकेकारवमाकर्णयद्भिः भगवतः पद्मबान्धवस्य मार्गवशादागतस्य रथस्य रज्जुत्वं वहद्भिः फणिभिः विश्लथत्वं क्रियते।

किं बहुना गरुडगन्धर्वयक्षकिन्नरनिलिम्पसिद्धविद्याधराः प्रियाङ्गनाभिस्सह अधिष्ठितविमाना नन्दनवनमुत्सृज्य तस्यामेव सञ्चरन्ति।

तस्याः मध्यभागे भगवता साम्बमूर्तिना अधिष्ठितः कनक-प्रासादः हिमगिरिदर्शनसमागतमेरुगिरिरिव विराजते ।

तस्य प्रासादस्य समीपे भिल्लपुरन्ध्रीकुचतटरचितमृगमदपरिमल-द्विगुणीकृत कुमुदकुवलयकमलगन्धगन्धिलबन्धुरगन्धवहशिशुविसर-

In Public domain. Digitization Muthulakshmi Research Academy

प्रसारपरितोषितप्रान्तचरदमरमिथुनसंवीक्ष्यमाणजलविकिरमिथुनमदन-क्रीडारम्भसमयकृतकलकलरवेणाह्वयन्तीव जनान् शतपत्रनेत्रविलासेन वीक्षतीव लसमाना, मुहुर्मुहुर्निमज्जदातपखिन्नमत्तवारणतुण्डमण्डलाग्र-विनिर्गतशीकरनिकरप्रसाराहततटप्ररोहानोकहनिवहमञ्जुमञ्जरीपुञ्ज-समुत्पतन्मिलिन्दबृन्दमधुरझङ्कारश्रवणेन कुसुमेषु चापटङ्कारशङ्कया चकितानां किन्नरीणां नारीविहारार्थमागतानाम् आनन्दकृत्पुलिन्दसुन्दरी-सुन्दरकुचकन्दुकाहतनिस्तन्द्रतुङ्गरङ्गत्तरङ्गरयोच्चलदुत्पलकमलमाला महाकविरचितकवितेव रसोज्ज्वला, वैकुण्ठनगरीव पद्मालया, अमरा-वतीव हरिसेविता, चिरण्टीव वेणीविराजिता, मत्तकाशिनीनेत्रश्रीरिव अञ्जनोद्भासिता, लङ्केव पुण्यजनसेविता, दिनकरोदयवेलेव तमोनाशिनी, द्यौरिव, चरत्पतङ्गा, तर्कवाणीव शितिकण्ठालङ्कृता, व्याकरणसूत्र-समितिरिव वररुचिविराजिता, भङ्गान्वितापि चिरसुखदायिनी, विषस्वरूपिण्यपि सन्मार्गपरिचया, हस्तिन्यपि पद्मिनी, दिव्यनदी बभूव।

तस्यां नद्यां कालत्रयेषु कृतावगाहाः निर्वर्तितसन्ध्याद्यनुष्ठा-नकलापाश्च तपोधनास्तस्मिन् प्रासादे तदन्तिकलतागृहेषु च निवासं चक्रुः ।

एवञ्च तपोधनार्थमागतः कलिङ्गदेशात् कुशलवर्तिनस्सूनुः धरणीसुर-कुलावतंसः महाभागो नाम तां नदीमद्राक्षीत् ।

दूरादेव ललाटफलकनिहिताञ्जलिपुटः प्रणम्य त्रिलोकजनन्यै भगवत्यै सकलदुष्कृतापहारिण्यै भक्तजनसन्तोषसन्दायिन्यै, तुभ्यं नमो

In Public domain. Digitization Muthulakshmi Research Academy

नम इत्युक्त्वा तदम्भःपूरे कृतस्नानः कृतसन्ध्याप्रणामः तस्या निर्गत्य हेमालयं ददर्श ।

संविलोक्य अहो मम भाग्यातिशयः। येन कारणेन आगतेन मया ईदृशमहिमा वीक्षित इत्युक्त्वा वीक्षितशम्भुलिङ्गः परिचित-सकलमुनिजनस्सन् इत एव निवासयोग्यतेति निश्चित्य तत्र संस्थितस्सन् दिवसमगमयत् ।

तस्मिंश्च समये दाडिमीकुसुमारुणस्तरणिः कनकघट इव अपरजलनिधिं विवेश ।

सर्वतः सन्ध्यारागः गगनाटव्याः किसलयराग इव उत्पन्नः ।

तमः स्वमणिपतनात् दिक्कुहराण्यालोकितुमागता द्यौरिवि रराज ।

तारागणश्च यामिनीभामिनीवक्षस्थलमुक्ताफलहार इव लसमानः ।

अथ उदयगिरिमहीपतेस्समयकिङ्करकरधृतपङ्कजरागखचितच्छत्र इव, सकलसुरभामिनीललाटफलकविरचितसिन्दूरतिलकाङ्कितपद-पङ्करुहायाः सुत्रामललनायाः प्रासादशिखरोज्जृम्भमाणकनककलश इव, गगनगहनान्तरालपुष्पितपलाश इव, प्रियवियोगजनिततापानलकीला-कलापदन्दह्यमानमानसमानिनीजनविक्षिप्तमीनकेतनलोहितारविन्द इव, लसमाने शशधरे निशामुखे, सङ्केतमहीतलानि गतासु सुरपतिमणि-प्रभाभासमानवसनावकुण्ठनास्वभिसारिकासु, विलीनेषु मधुकरेषु कञ्जातपुञ्जमुकुलेषु, गतेषु दिङ्मुखानि प्रियवियोगदुःखानल परितप्य-

In Public domain. Digitization Muthulakshmi Research Academy

मानमानसेषु मदरथाङ्गविहङ्गसमुदयेषु पतत्सु मरन्दबिन्दुसन्दोहविलसित-कुमुदकुवलयेषु पुष्पलिट्कुलेषु मधुर झङ्काररवेषु, सङ्गतेषु मदकुम्भि-कुम्भमौक्तिकाङ्कितनखकेसरिकिशोरैराश्रितदरीमुखानि तिमिरसमूहेषु चकोराङ्गनासु वल्लभैस्सह क्रीडितासु, बाष्पविलसितनयनासु सकल-विरहिणीजनजैत्रयात्रासक्तमदन वसुधारमणकरसरोरुहा-च्छशङ्क इव रराज कुमुदराजः।

चन्द्रिका च तत्कालजनितोद्दामसंभ्रमघूर्णायमाणदुग्धोदधि-तुङ्गतरङ्गमालिका विराजन्ती सामन्तमन्दिरान्तरालचन्द्रशालासु शशधरोप-लखचितपाञ्चालिकाकर विरचित स्फटिकद्रोणीप्रवाहेषु मग्ना सती नवनवरत्नखचितकनकसौधान्तराल डोलाक्रीडाविराजन्तीनां कामुकीनां भर्तृवक्षस्थलालिङ्गितानां रत्नताटङ्कधालधल्यप्रभाप्रभासितकपोलदर्पण-विलासान् स्पृशन्ती पतिभिरालिङ्गितानां तिर्यक् प्रसारित वदनानां प्रणयकलहकुपितमानिनीनां नयनकुमुदप्रभाभिस्सह विराजन्ती, कुसुमायुधरणोद्युक्तानां रमणीनां रमणैर्युक्तानां चलन्मुक्ताहारनाय-कान्तरालघटितपटुतरवज्ररुक्पटलैस्सम्मिलन्ती लावण्यरसोद्गारेष्विव लसमानेषु कुसुमेषु क्रीडायासजनितस्वेदजलकणेष्वङ्गनावयवेषु प्रसरन्ती, रजतपात्रनिहित मधुपानमदमत्तमत्तकाशिनीनां स्मितकटाक्षवीक्षणैः मदिराप्रवाहभ्रान्तिं कुर्वन्ती सकलजनमानसोत्पलामोदसन्धायिनी रेजे।

तस्मिन् काले सकलमुनयः कृतसन्ध्यावन्दनाः भगवन्तं सिषेविरे।

महाभागोऽपि निर्वर्तितकालोचितव्यापारः पशुपतिसन्दर्शनार्थम् अमलकनकमयालयं विवेश ।

In Public domain. Digitization Muthulakshmi Research Academy

प्रविश्यामन्दानन्दरससम्भरितान्तरङ्गस्सन् गम्भीररवेणेत्युवाच ।

हे भगवन् सकलसुरकोटिमुकुटाग्ररत्नप्रभानीराजिताङ्घ्रिकमल, दिव्यमङ्गलविग्रह निरङ्कुशप्रताप तावकीयकरुणारसेन मां सिञ्च, स्मितकटाक्षवीक्षणैर्विलोकय, प्रसीद स्वामिन् मुदहृदयं दुर्विनीतियुक्तं नरपशुमविदितसुज्ञानलेशं अहङ्कारसहितं गर्वाभिमानिनं युक्तायुक्त-विवेकशून्यं दुष्कर्मणाधिष्ठितं सकलदोषाश्रयं मां दुर्गमसंसारार्ण-वात्त्रायस्व त्वत्पादारविन्दयुगलध्यानाराधनधनं देहि, अनवरत-सकलविद्याभ्यासप्रसक्तहृदयं कुरु दुर्विषयसङ्गान्निवर्तय ।

नमस्ते मुकुन्दबाणाय नमस्ते समुद्रतूणाय नमस्ते जितम-करकेतनाय लोकत्रयनिकेतनाय, नमस्ते कलुषभुजगनागान्तकाय, मथितान्तकाय तुभ्यं नमस्सङ्गरानर्गल बाहुदण्डाय खण्डितमदवेतण्डाय तुभ्यं नमश्शत्रुसंहाराय हराय, तुभ्यं नमस्समाश्रितगिरीशाय गिरिशाय मत्संरक्षणासक्तहृदयो भव, न सहस्रफणोऽपि समर्थः स्तोतुं त्वां कुतस्समर्थोऽयं जनः किं बहुना, स्वप्नेष्वपि त्वत्पदध्यानमेव याचे न याचेऽन्यमित्युक्त्वा तस्मान्निर्गत्य तदन्तिकस्थितमम्बिकागृहं प्राविशत्।

श्लो।। रत्नस्थापितहेमपीठलसितां रक्तारविन्दाम्बरां
सुत्रामाश्मनिभाङ्गरागसहितां श्रीचन्दनालङ्कृताम् ।
अद्राक्षीदरुणाम्बुजातरुचिना हस्तेन खड्गधृतां
कान्तां रक्तसरोजकोमलपदां चन्द्राननां चण्डिकाम् ।।९।।

In Public domain. Digitization Muthulakshmi Research Academy

संवीक्ष्य तच्चरणारुणसरोजकोमलरुच्या वज्रस्थापितायामपि पद्मरागरचितायां स्थितायामिव भूमौ चिरं पपात ।

मूहूर्तमिव च स्थित्वा चोत्थाय शिरसि अञ्जलिं निधाय निश्चलान्तरङ्गः तद्दिव्यमङ्गलविग्रहे दत्तदृष्टिः महाभाग इत्युवाच ।

सकलमुनिसमूहैस्सेवितं निश्चलेन
चरणकमलयुग्मं चेतसा चिन्तयामि ।
भगवति भवदीयं रक्षिताशेषलोकं
कनककठकरत्नैर्जृम्भितं लोकपूज्यम् ॥१०॥

हे अम्ब! रणितरत्नमञ्जीरविलसितारुणसरोजकोमलपदविन्यासाः पृथुपयोधरभारचलितमध्यभागाः अंसतलविलसितमण्डलीकृतवेण्यः झणंझणायमानरत्नकङ्कणोद्दीपितप्रकोष्ठप्रदेशाः निजाभरणघटितपटुतर-मणिगणकिरणधगद्धगितप्रान्तप्रदेशाः स्वेदजलकणाङ्कितानन्नकमलाः ईषदाविर्भवन्निश्वासमरुच्चलद्दन्तांशुकप्रवालोल्लसन्त्यः सुरेन्द्रोपलखचिता-नपि चामीकरमयचामरदण्डाः पद्मरागरचितानिव कुर्वन्त्यः करकिसलयैः शनैश्शनैर्वीजयन्त्यः, सुराङ्गनास्त्वामेव सेवन्ते। कोकिलकाकलीकलरवेण गन्धर्वकान्ताः कनकवीणाभिर्वादयन्ति, सकलामरचामीकरगात्र्यः त्वदनुग्रहं काङ्क्षिण्यः त्वामेवाश्रयन्ते ।

त्रिलोकजननि! किंबहुना भगवान् परमेश्वरोऽपि त्वद्विनोदार्थ-मधिष्ठितायास्तवाग्रभागे सिंहासनं ताण्डवं करोति । देवि! सुतकल्पं मां रक्ष रक्षेत्युक्त्वा तस्मान्निर्गत्य तपोधनैस्सह निशामगमयत् ।

In Public domain. Digitization Muthulakshmi Research Academy

सङ्गरश्रमजलकणेन आर्द्रमदनहस्तस्रस्तमल्लिकाचक्रमिव अपर-जलनिधौ पपात चन्द्रः ।

वीथीविटश्रवणकठोरमार्गणव्रणसदृशचरणप्रहरणादीरितध्वनौ दिगन्तराले सङ्क्रान्ते। इक्षुकार्मुकाग्रादाकृष्यमाणे द्विरेफसिञ्जिनीं पञ्चबाणे, मदनकदनक्लान्तकान्ताकुचलिकुचजनितस्वेदलवमपहरति श्वसन-शिशुसमूहे। कुलाङ्गनासु कुचतटरचितमृगमदसङ्कुमुदचन्द्रचन्दनकुङ्कुम-पङ्कलुलितहारान् रत्नकटककाञ्ची कङ्कणकर्णपत्रमुखविविधभूषणानि च सम्यक् स्थापयित्वा केलीगृहेभ्यः निर्गतासु जागरारुणनयनेषु पल्लवेषु कृत्रिमनिद्राभाक्षु निजभवनशयनेषु लुठत्सु पद्मिनीमनोहरस्सर्वजन-पुण्यराशिः पूर्वगिरिशिखरमाससाद भगवान् लोकबान्धवः।

महाभागः तत्पूर्वमेव सकलमुनिजनैस्सह कृतस्नानः सहस्रकिरणाय अर्घ्याञ्जलिं दत्त्वा ततः पञ्चामृतैश्शम्भुलिङ्गमभिषिच्य धूपदीपनैवेद्य-प्रमुखोपचारैराराधितपशुपतिः दिनदिनप्रवर्धमानतपोधनस्तत्रैव चिरकालमावासं चकार ।

एवं च स्थिते कस्मिन् शुभदिने तपोधनान् प्रति इत्युवाच महाभागः।

युष्मदाशीर्वचनबलेन भगवतस्साम्बमूर्तेः त्रिलोकजनन्याः पार्वत्याः प्रसादेन च अमरावतीविलासान्वीक्षितुमिच्छामि इत्युक्त्वा तैर्मुनिभिराज्ञां गृहीत्वा सुरेन्द्रपुरं प्राविशत् तपःप्रभावस्य अनर्गलत्वात् मुहूर्तमात्रेण।

In Public domain. Digitization Muthulakshmi Research Academy

प्रविश्य पुरप्राकारस्य बहिःप्रदेशे अध्वखेदमपहर्तुमानीतं रत्नकनक खलीनमतिसितैर्दन्तैर्दृश्यमानतया कटकुटरवेणोपेतं तदानीमेवाधिष्ठित-जयन्तेन मुच्यमानतया सर्वावयवेभ्यः फेनपटलमुद्गिरन्तं रणितरत्न-मञ्जीरतया कूजद्राजहंसमिव विराजन्तं नवनवरत्नखचितारुणपल्याणतया विद्युन्मरीचिसमूहमिव सर्वजनदृष्टिहारिणम् ऊर्ध्वप्रसारितघणङ्घणाय-मानेककनकघण्टाकण्ठतया सर्वजनान्वीक्षितुमात्मानमाह्वयन्तमिव स्थितं, जयन्तहस्तनिहितपारिजातकुसुमशिरोभूषणतया घुमुघुमायमानं, बाणबाणासनतोमरमण्डलाग्रमुखानेकायुधोपेतैः त्रिचतुर्भि र्वीराग्रेसरै-रनुगम्यमानं, मत्तवेतण्डतुण्डानुकारिबाहुदण्डयुगलस्य अंसद्वयचुम्बित-श्रवणपुटस्य अतिविशालकवाटोल्लसद्दोरन्तरालस्य रत्नकनकवलयविलस-द्वामकरतलनिभृतातोत्रस्य सव्यकरेणाक्षिप्तकनकखलीनस्य अश्व-शिक्षकस्य पृष्ठतः गच्छन्तं उच्चैःश्रवसं नाम हयाधिराजं अतिस्वच्छमति-बलयुक्तं अमरपतिराज्यलक्ष्मीनिवासपंद ददर्श ।

समवलोक्य प्रमुदितहृत्कमलश्रिरमिव स्थित्वा वीक्ष्य अहो अस्याश्वस्य प्रभावः। किमिति तर्कयामि तुरङ्गरत्नमिति चेत् सर्वरत्नाकरा-द्दुग्धोदधेः समुद्भवः त्रिलोकपूजनीय इति चेत् त्रिलोकाधिपतिना वज्रिणा स्वयमेव परिकल्पिताहाराद्युपहारातिशयः, लक्ष्मीनिवासपदमिति चेत् भगवत्या महालक्ष्म्या सहाविर्भावः अमुना अश्वरत्नेनैव सकलसुर-कोटिमकुटमणिगणकिरणोज्जृम्भितचरणयुगलेन वासवेन पालितस्य स्वर्गस्य महिमा कथ्यते सर्वलोकोत्कृष्ट इत्युक्त्वा तस्मान्निर्गत्य द्वारम् आसाद्य वेत्रधरमवोचत् ।

In Public domain. Digitization Muthulakshmi Research Academy

युष्मद्दर्शनकुतूहलहृदयस्सन् महाभागो नाम तपोधन आगत इति निवेदितव्यममरेश्वराय इति तत्रैवोदीर्य तस्थौ ।

स सभास्थलीमचिरमेव गत्वा दूरादेव नमस्कृत्य विज्ञापयामास महाभागवचनमिन्द्राय ।

पुरन्दरस्तूरुयुगलजितरम्भया रम्भयारम्भितपटुनटने दत्तदृष्टिरपि सिंहासनाद्धठादुत्थाय विहाय च छत्रचामरवेणुगानादिमहाराजचिह्नानि रत्नखचितकनकवेत्रग्रहणेन प्रतीहारयुगलेन उभयपार्श्वगतेन निर्दिश्य-मानमार्गः जयन्तेन सहमहाभागसमीपमेत्य तमुक्तवान् ।

अहो महाभाग! मम धन्यता पुण्यात्मनां युष्माकं दर्शनमभूत् मयि वत्सलत्वं खलु युष्मदागमनकारणम् परमहंसदर्शनेन खलु तमोनाशनम् विजितान्तश्शत्रुवर्गाणां सर्वेऽपि बान्धवाः तैः कैश्चित् देवानांप्रियैः नृपालैर्न ज्ञायते भस्मनाच्छादिताग्निरिव सत्त्वतपोधनप्रभावः यैस्सर्पैरिव वक्रमार्गैः व्याघ्रैरिव भीषणवृत्तिभिः पशुभिरिव युक्तायुक्त-विवेकशून्यैः वानरैरिवातिचपलस्वभावैः निशाचरैरिव नृहिंसातत्परैः उत्कटमदगजैरिव उन्मादसहितैः पिशाचैरिव अतिकम्पितप्राणिलोकैः वृषभैरिव दर्पोज्झृम्भितैः बधिरैरिव श्रवणपुटप्रवेशरहितदीनालापैः मूकैरिवाप्रत्युत्तरसज्ञनसम्भाषणैः।

अपि च अत्यायतनेत्रैरपि अदर्शितपुण्यमूर्तिभिः अतिनिर्मल-शरीरैरपि पङ्कावृतैः सर्वाभरणालङ्कृतैरपि अभूषितैः अनुलिप्तचन्दनैरपि नामोदितैः दानोज्झृम्भितैरपि अत्यागशरीरैः अतिसुकुमारावयवोपेतैरपि

In Public domain. Digitization Muthulakshmi Research Academy

कठिनतरैः अपरिमितायुधोज्झृम्भितैरपि सदाधिष्ठितपञ्चबाणैः कर्बुराधिक्योपेतैरेव पापकर्मरतैरित्येतानि वाक्यानि वदन्तम् अमरेश्वरं अवदत् महाभागः ।

सुरेन्द्र। केन हेतुना निन्दयसि तान् ये कुलोचितधर्मेण उपयुक्ताः परदारधरणादिषु निस्पृहाश्शान्तमूर्तयः ते क्रीडन्त्येषु स्वर्गभवनेषु इतरे मूढजनास्तु दण्डधरनगर्यां तत्तत्कर्मानुगुणफलमनुभवन्त्येव ।

अपि च, पूरिताशेषलोकमप्यगोचरम् अतिसूक्ष्ममपि महत्तरम् असर्वजनसाधारणप्रेक्षणीयम् अक्षयम् अनन्तमवाच्यम् आदिमध्यान्तर-हितं किमपि तेजो ध्यायन्तः निश्चलान्तरदृष्टिमार्गेणेन्द्रियतुरङ्गप्रभावान् सम्यक् परिशीलयन्तः षड्रिपूणां विजेतारः महामुनयः सदा मोदेन सह युक्ताः क्रीडन्त्येव तेषां हि खलु सुफलं जन्मेत्युक्तवति महाभागे तस्य करमवलम्ब्य तेन सहासीदुन्मुखस्सभास्थलीमिन्द्रः।

कक्ष्यान्तरानेकरत्ननिर्मितद्वारबन्धानतिक्रम्य धालधल्यप्रभाप्रभा-सित वज्रखचितकुड्यान्तरालवातायनप्रदेश निहित कनकपञ्जरस्थित-शुकशारिकाप्रसङ्ग मधुरवचनरचनैः झणंझणायमानरत्नमञ्जीरविलसत्पद-विन्यासानुगुण धिमिंधिमिनिनदमिलितमधुरगीतारवलसन्तीनां नर्तित-वाराङ्गनानां नयनप्रभाविद्युद्भिः अनवरतदह्यमानकृष्णागरुधूमरेखाभिः कुचकलशेष्वनुलिप्तमृगीमदरसं कुमुदचन्द्रचन्दनकुङ्कुमपङ्कामोदद्विगुणी-कृतचामरग्राहिणीवेणीविरचित पारिजातकुसुमपरिमलैः सकलसुरकोटि-सङ्घट्टनजनितरत्नप्रभूषणरेणुपटलेन आच्छादिताभिरेव पाञ्चालिकाभिः

In Public domain. Digitization Muthulakshmi Research Academy

पुष्पितारामक्रीडालसितवनिताभिरिव पश्यञ्जन दृष्टिहारिणीभिः उज्जृम्भितायाः सभाया मध्यभागे रत्नदेदीप्यमानकनकसिंहासने तं सुखासीनं कृत्वा तदाज्ञया स्वयमप्यर्हासने निषण्णे तन्मृदुवचनसमाकर्णनेन तुष्टहृदये सुरेन्द्रे षड्घण्टाठङ्कारवमिलित-सायाह्नशङ्खध्वनिरभवत्।

अथ भेरीपटहढक्कामृदङ्गमुखतूर्यध्वनावशेषभवनगोपुरेषु सङ्क्रान्ते कर्पूरकरदीपिकासमुत्करे रत्नभित्तिभागे प्रोज्वलति उद्यानतरुषु श्राविते शुकपिकमुखसकलविकिरनिकरकलकलनिनादे

तस्मिन् काले वारिविहारार्थमागतैरनवरतदानधाराप्रवाहद्विगुणीकृत कुमुदकुवलयपद्मसौरभायां मन्दाकिन्यां सपुत्रेण पुरन्दरेण सह कृतसन्ध्याप्रणामः महाभागः तस्या निर्गत्य अमृतफेनपटलधवलज्योत्स्नापूरेण दशदिशः सिञ्चति सुधाकरे

नन्दनवनकुसुमपरिमलमिलितमारुतेन वीज्यमानः तद्दर्शनकुतूहलहृदयः कतिपयपदानि गत्वाऽनवरतकुसुमनिकरपतितमरन्दबिन्दुसन्दोहपूरिताच्छस्फटिक शिलाबद्धद्रोणीभिः कलानिधिशिलाखचितालवालैः,

मरकतमणिनिर्मितसङ्गीतवेदिकाघृणिसङ्घातान् घासशङ्कया भक्षणोत्सुकबालहरिणीभिः सखीजनपरिवृतायाः पाकशासनवल्लभायाः चरणलाक्षारसाञ्चित वज्रखचितप्रदेशान् स्थलसौगन्धिकभ्रान्त्या चञ्चूपुटाग्रैः खादनासक्तराजहंसशाबकैः,

शुकतुण्डखण्डितफलरससिक्तसकलतरूणामधोभागैः पुष्पितैः आश्रितदाक्षालतापिहितमाकन्दनिकुञ्जैर्विराजत् चिरण्टीफालभागमिव

In Public domain. Digitization Muthulakshmi Research Academy

तिलकाङ्कितं कदनतलमिव कदम्बसङ्कुलम् वैश्रवणधनकगृहमिव कुन्दोपेतम्, वसुमतीश्वरसभास्थलमिव पुन्नागभासुरम् रूपजीवनीमन्दिर-मिव सपल्लवम् भागवतमिव शुकमुखकथितहरिगुणगणोज्वलम्, भारतसमरमिव अत्युन्नतार्जुनप्रभावम्, रामायणमिव सुमनोभिरामम् मकरकेतननिषङ्गमिव सुमकदम्बसम्भृतम् शृङ्गारनायकमिव कलकण्ठी-समासक्तम् -

आश्रितनीलकण्ठमपि मदनाश्रयम् सन्तानोज्वलमपि दारकरहितम् नन्दनवनमधिगम्य राजंहसैः यज्ञोपवीतं बिसतन्तुभ्रान्त्यावलोकयद्भि-रत्यादरेण वीक्ष्यमाणः कोकिलकिशोरैः अरुणजटापटलाग्राण्य-वलोकयद्भिः दृश्यमानः नटाग्रः अंसतलविलसितकृष्णाजिनमालोकयतां कलापिनां केकारवान् शृण्वन् प्रान्तप्रावृतकेतकीकुसुमरजसाच्छादि-तावयवः कुतूहलेन सकलतरुवीथीषु सञ्चार्य स्फटिकद्रोणीमार्गेण गच्छन् निष्यन्दमरन्दपानरतभ्रमरकुलपिहितमञ्जरीभिः फलरसासक्त-शुकीशुकमिथुनाधिष्ठितशाखाभिः पुरन्दरप्रमदाकरकरकञ्जातयुगलेन अनीतरत्नखचितकनककलशाम्बुपूरपूरितालवालैः परिशोभितसुरतरून् संवीक्ष्य तदामोदेन परितोषितहृदयः भगवतस्साम्बमूर्तेः पूजार्थ-ममरनदीजातजाम्बूनदाब्जपुटे पारिजातकुसुमान्यादाय तद्वनमुत्सृज्य अमरपतिनिर्दिष्टपशुपतिभवनमधिगम्य ससम्भ्रमः तस्य भगवतः कृत्वा पूजां भक्तियुक्तामग्रभागे शिरसि निधायाञ्जलिमित्युवाच ।

In Public domain. Digitization Muthulakshmi Research Academy

वन्दे चन्द्रधरं वृषेन्द्रतुरगं वन्दे भवानीपतिं
वन्दे शङ्करमब्जगर्भविनुतं वन्दे शिवं शूलिनम् ॥
वन्दे नीलगलं त्रिलोकनिलयं वन्दे गिरीशं हरं
वन्दे चन्दनचन्द्रकुन्दधवलं वन्दे जगद्रक्षकम् ॥११॥

गङ्गातुङ्गतरङ्गसङ्गतजटानिष्ठ्यूतहेमाब्जसत्
किञ्जल्कालिरजोविभूषितपुरं सारङ्गराजत्करम् ॥
वन्दे माधवहेमगर्भसुरराट् मौल्यग्ररत्नांशु स
ङ्घातप्रोज्वलपादपद्मललितं कोटीन्दुतुल्यद्युतिम् ॥१२॥

॥ नमस्ते सर्वलोकेश नमस्ते त्रिपुरान्तक ॥
॥ नमस्ते पञ्चवक्त्राय गिरीशाय नमो नमः ॥१३॥

गौरीकान्तं जितरविसुतं सोमसूर्याग्निनेत्रं
वन्दे सोमं सुरमुनिनुतं शान्तियुक्तं महेशम्
लक्ष्मीकान्तप्रणुतयशसं खण्डितारातिवर्गं
वन्दे भीमं मदगजहरं सर्वदिक्पालनाथम् ॥१४॥

इत्युक्त्वा तद्ध्यानासक्तहृदये महाभागे स्थिते तत्रैव कामधेनोरानीतं दधि इदमिमानि फलानि रसभरितानि कल्पतरुजातानि भक्ष्यतेति सङ्क्रन्दनेन प्रार्थितः तानि गृहीत्वा तस्मान्निर्गत्य अधिगम्य सभां रत्नसिंहासने पुरन्दरद्वितीये महाभागे निषण्णे पाञ्चालिकाकरचामरैर्वीज्यमानः सङ्क्रन्दनस्तमुवाच ।

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिपदगलद्रसममलतरं मह्यं कमपि वृत्तान्तं कथयतेति पुरन्दरेण पृच्छ्यमानस्सन् आसीत् वक्तुं कथाम् ।।

अभवदशेषमेदिनीपतिमकुटमणिगणकिरणलसच्चरण कमलयुगलः पुरन्दर इव वज्राञ्चितपाणिः खण्डितारिभूभृत्कुलश्च, कुबेर इव सर्वसम्पद्दीप्तः राजराजश्च, सूर्य इव प्रभाकरस्तमोभञ्जनश्च, चन्द्र इव कुवलयाह्लादकरः सत्पथावलम्बी च, सागर इव कमलाश्रयः सेवितकविसमूहश्च शम्भुरिव राजशेखरः शिवाञ्चितश्च, विष्णुरिव द्विजराजसेवितः सात्त्विकगुणप्रधानश्च परमेष्ठीव चतुराननः वाणीश्वरश्च महेन्द्रोऽपि न गोत्रवैरी धनपतिरपि नोग्रसखः पद्मिनीनायकोऽपि न सन्तापकरः राजा अपि न दोषाकरः वाहिनीनायकोपि न दरसहितः ईशोऽपि न भुजङ्गभूषणः श्रीपतिरपि न पुण्यजनविरोधी प्रजापतिरपि न रजोगुणप्रधानः सङ्गरोन्मुखो नाम राजा केरलाधिपतिः ।

यः करोति चक्रवालस्यापरभागस्थितानां चक्रवाकयुगलानां मुदं निजप्रतापेन ।

यमलङ्कुर्वन्ति ललनाकरकमलप्रोक्षिप्तकुङ्कुमरसधारोज्जृम्भितावयवमिव अङ्गवङ्गकलिङ्गमुखनिखिलनरपतिमकुटमणिगणघृणयः ।

येन शत्रुकान्तानेत्रशतपत्राणि सनालानीव क्रियन्तेऽनवरतबाष्पमोचनेन, यस्मै नानादेशनरनाथाः करितुरगरत्नरत्नाभरणाद्युपायनानि दत्वा स्थित्वा अग्रभागे अञ्जलिपुटान् ललाटफलकेषु संस्थापयामासुः।

यस्मात् करिकिरिकमठादयः प्रियाङ्गनाभिस्सह आमोदन्ते ।

In Public domain. Digitization Muthulakshmi Research Academy

यस्य राज्ञः कलङ्कधारिणं शशिनम् अलिकुलविनीलवेणीं वाग्वधूटीं मदमलिनगण्डभागमैरावतं नीलकन्धरं साम्बमूर्तिं विहस्य अमृतफेननिकर शरकुसुमदर शरदभ्रशुभ्रकीर्तयस्सकललोकेषु सञ्चरन्ति ।

यस्मिन् महीपाले पालयति महीं करिषु करप्रसारणं सुरतान्तेषु श्रमजलकणोद्गमः नदीतटेषु भङ्गपाताः फणिषु वक्रमार्गाः, भ्रमर-समूहेष्वासवपान रतिः लक्ष्यभेदेषु बाणमोचनम् वारिप्रवाहेषु पङ्कसङ्कुलं, काव्येषु विरोधः शास्त्रप्रसङ्गेषु विवादः व्याकरणसूत्रेष्वपवादशब्दश्रवणम् प्रणयकुपितकोपनासु कोपः परकान्तावलोकनेषु अन्धता, वाराङ्गनासु परपुरुषमोहः नवोद्यानतरुषु चरणताडनानि कुसुममञ्जरीषु रजोगुणाः अनवरतक्रमाचरितक्रतुषु पशुहिंसा, सदाराधनेषु नम्रत्वम् ललनावेणीषु मलिनता, प्रदोषवेलासु रागोदयाः कान्तागमनेषु मान्द्यम्, अलङ्कारेषु भ्रान्तिः तुरङ्गेषु धावनानि शिशुवचनेषु अपशब्दप्रयोगाः तपोधनेषु कन्दमूलफलाहारः क्रोधेषु दुर्भिक्षम् कान्ताभरणेषु रणः शुकनिकरेषु फलखण्डनम्, पिकेषु अरुणनेत्रत्वम् सारङ्गेषु तृणखादनम् पर्वतेषु कठिनत्वम् हेमाग्निशिखासु प्रज्वलनम् कवितासु विचाराः महोत्सवेषु बाष्पोद्गमः काननेषु खड्गभीतिः राजद्वारेषु निरोधनम् धौतार्द्रपटेषु आतपप्रवेशाः लोहेषु अनलपरितप्तता, मानवानामभवन्।

अनुभवितसर्वसुखस्सङ्गरोन्मुखस्स राजा अब्धिमेखलां सार्थ-वसुमतीनाम्नीं अखण्डधर्ममार्गेण चकार ।

In Public domain. Digitization Muthulakshmi Research Academy

चिरेण महीपालनं कृत्वा आर्यहितनामधेयम् मन्त्रिणम् अग्रजन्मान-माहूय अर्हासने निषिण्णं कृत्वा तमुवाच ।

आर्यहित, मद्भुजपरिपालितमेदिनीभारोद्धरणे नियोजितः मयासि।

अहमिव सकलनृपतिसंसेव्यमानचरणकमलोऽसि ।। ममेव हि चतुरुदधिमध्यगतनृपतयः वहन्त्याज्ञां मस्तकेषु ते ।

किंबहुना मयापि त्वदालोचनेन विना यत्किञ्चिदपि नाचरितं खलु ।। अधीतसर्वशास्त्राय तुभ्यमुपदेशवाक्यं नास्त्येव - तथापि किमपि वाक्यं शृणु वक्ष्यामि ।

आयुष्मान् करालवक्त्रो नाम मे अयं पुत्रः अविदितशास्त्रलेशः अनुदितयैवनोदयः त्वया रक्षणीय इत्युक्त्वा त्यक्त्वा तनुमगाद्वैकुण्ठम्।

ततः परलोकगतस्य सङ्गरोन्मुखस्य सर्वकर्माणि निर्वर्तयामास आर्य-हितानुमत्या विद्युक्तप्रकारेण करालवक्त्रः।

अथार्यहितनियुक्तेन अधीतवान् सर्वशास्त्राणि नरपतिः, क्रमेण चादृश्यत यौवनोदयः महीपतेः ।

तथाहि ।। आननविकचाम्भोजे मधुकरराजिरिव रराज श्मश्रुरेखा।। मदकुम्भिकुम्भमिव उन्नतिमभजत अंसयुगलम् ।। वीक्षणमदनशरान् विकिरति नयनकमलयुग्मम् । सर्वावयवेभ्यः स्रवन्ति लावण्यरसस्रवन्त्यः नर्मगर्भत्वं जातं नृपालकुसुमेषु मधुरवचनेषु नृपालस्य ।।

In Public domain. Digitization Muthulakshmi Research Academy

एवं च स्थिते कुसुमशेखरो नाम ताम्बूलकरण्डधरः तं प्रभुशिखामणिं नमस्कृत्य मुकुलिताञ्जलिस्सन् उवाच ॥

इदानीमामोदमुदितमदषट्पदसमुदयमधुरगीताकर्णनप्रचलितपथिकमदवती हृदयारविन्दः विकसितनवमल्लिकामुकुलनिकरपरिमलघुमुघुमितसकलदिगन्तरालः, छायार्थमातपक्लान्तपान्थजनसेव्यमानकिसलयगुलुच्छोल्लसितसहकारनिकुरुम्बः गलन्मरन्दबिन्दुबृन्दकुसुमभास्वत्सुकलमहीरुहनिवहः नन्दनवनप्रवेश इव सुरसालपुष्पगन्धगन्धिलः चिरण्टीकण्ठभाग इव प्रवालसुन्दरः, मदनहस्त इव सम्भृतकुसुमकाण्डः सागर इव वनविराजितः, दुर्जनजनपतिरिव, रजःप्रधानः, प्रौढकविकृतप्रबन्ध इव विलसन्मत्तकोकिलचम्पकोत्पलमालः, माधवोऽपि मधुपोषकः दीव्यति वसन्तः ॥

तथाहि भगवतः पुष्पसायकस्य जैत्रयात्रोत्सुकस्य अरुणपटालङ्कृतरथनिकरा इव किसलयैरुपलक्षितास्सकलतरवः ॥

तरुणसहकारकिसलयग्रासमत्तकोकिलानां कुहूकाररवाः पथिककान्तामानसानां भयञ्च जनयन्ति ॥

कुसुमात्कुसुमं पतन्तः मधुरं झङ्कारं कुर्वन्तः शिलीमुखाः शिलीमुखा बभूवुर्विरहिणीनाम् ॥

कुसुमरजःपटलघुमुघुमितवनपवनसमूहास्सकलदिगन्तरालेषु कलयन्ति॥ चक्रवाकमिथुनोपलक्षिताः पुलिनतलविलसद्राजहंस

In Public domain. Digitization Muthulakshmi Research Academy

कुलकलकलरवेणोपयुक्ताः मधुकरपटलविनीलवेण्यः विकसितकुमुद-कुवलयदलाभिरामाः पद्मसौरभोल्लसिता नद्यः परं मुदम् उत्पादयन्ति पश्यज्जनानाम् ।।

तन्मृगयाविनोदानां महीपतीनामयं वनविहारस्य काल इत्युक्तवति कुसुमशेखरे प्रस्थानभेरी वाद्यतामित्यादिदेश तस्मै नरपतिः ।।

अथ कुसुमशेखरनियोगेन चटुलकेतुनाम्ना गजयोधाधिपतिना ताड्यमानायां प्रयाणभेर्याम् उदयगिरिदरीभागेषु प्रतिशब्दं कुर्वन् मलयनगचन्दनतरुकोठरान्तरालस्थितसरीसृपान् भुजगीसमालिङ्गनैः परितोषयन् अपरधरचरमगहनभाग सञ्चरत्करिकिरिभल्लूकमुखनिखिल-मृगखगनिवहान् सन्तर्जयन् हिमाचलोत्सङ्गगुहान्तराल प्रसुप्तकेसरि-किशोरान् प्रबोधयन् सकलदिगन्तेषु बभ्राम ध्वनिः ।।

अथ नरपतिकुलतिलकः लावण्यरसबिम्बितानेकसामन्तरत्नभूषण-प्रभाभासमान निजशरीरानुलिप्तचन्द्रचन्दनसङ्कुमुदपङ्कामोदमिलच्चामर-ग्राहिणीमुखकमलपरिमलार्थमागतद्विरेफपटलझङ्कारैः धिमिकिठनिनाद-सङ्गतनटद्वाररमणीरत्नरत्नमञ्जीरकङ्कणरवैस्सन्तुष्टान्तरङ्गः वेत्रग्रहण-हुङ्कारप्रचलितनरपतिनिकरानानन्दयन् कटाक्षवीक्षणैः अन्तः पुरान्निर्गत्य प्रविश्य द्वारभूमिं उच्चैःश्रवसमिव उल्लसन्तम् अश्वशिक्षकेनानीतम् ऊर्ध्वप्रसारितोत्तमाङ्गम् अतिबलोपेतं तुरङ्गममालोक्य रत्नोर्मिका-किरणधगद्धगितकरकमलेन आस्फालयन् मन्त्रिणमार्यहितमाहूय तुरगसेनामादाय हिमधरकाननानि मृगयाविनोदार्थं गच्छाम इत्युक्त्वा

In Public domain. Digitization Muthulakshmi Research Academy

तुरङ्गममारुह्य निष्ठ्यूतामृतबिन्दुसन्दोहलसद्राकाकलानिधिनेव स्थितेन उपरिभागविरचितकनकमयशार्दूलाङ्कितेन आमलकैरिव स्थूलमुक्ताफलैरुज्जृम्भितकोटिभागेन धवलातपत्रेण उपलक्षितः।

तुरगखुरपुटपटलसमुद्घातप्रोद्धूतक्षितितलरेणुभिरन्धकारितगगनम् आत्मरत्नाभरणमयूखप्रभाभिः तेजस्विकुर्वन् मदनमल्लिकामार्गणैरिव कनकसौधतलसञ्चरत्कामिनीकरकमलविक्षिप्तैः मौक्तिकलाजैः लग्नावयवः भेरीपटहढक्कामृदङ्गवेणुगानादिनिनदैर्जयजयेति वन्दिजनोच्चारितशब्दैः वीराग्रेसराधिष्ठितवाजिहेषारवैः मृगयासक्तभटानामन्योन्यसम्भाषणकलकलरवमिलितधनुष्ठङ्कारैः अतिसम्मर्दनिवारणसमर्थवेत्रग्रहणहुङ्कारैः दिगन्तानि बधिरीकुर्वन्नगरान्निरगात् ।

निर्गत्य चानेकोद्यानतरुवरान् मधुरविमलसलिलपूरपरिशोभितनिर्झरनिकरान् पानार्थमागतपथिकजनकलकलरवाञ्चितप्रपासमूहान् मार्गमध्येषु विलोकयन् कुतूहलेन कतिपयदिवसनि गमयित्वा नटकुटजतालहिन्तालसालरसालबिल्वकपित्थलिकुचाश्वत्थमुखनिखिलमहीरुहशाखान्तरालस्थितशुकपिक शारिकाद्यनेकविकिरनिकरकलकलरवमिलदनिलप्रपूरितकीचकनिकरैः ऋक्षकरखर नखरनिकराहतजीर्णतरुकोटरान्तरालस्थितनिकराहतजीर्णतरुकोटरान्तरालस्थित विततमधुमक्षिकापटलचटचटस्यन्दमानमधुधारास्तबकितशाद्वलप्रदेशैः कापिशायनपानमदमत्तकपिकुलविकम्प्यमानविटपिपटलविटपसुमस्तबकनिष्यन्दमानमरन्दपानरतानवरतभ्रमद्भ्रमरकृतगीतारवैः

In Public domain. Digitization Muthulakshmi Research Academy

मत्तवारण कलुषितसरोवरागतविततकैरवेन्दीवरकोकनदपुण्डरीक-कमलगन्धबन्धुरगन्धवहामोदमुदितसिद्धविद्याधरसुन्दरीसुन्दर चरणारविन्द-विलसन्मञ्जीरमञ्जुलरवाहूयमानकादम्बकदम्बकलकलरवैः

सानुभागसञ्चरदमरवरवर्णिनीकचशरीरप्रभाणामालोकनेन नटच्चाप टिकपटलपटुकेकारवैः मदकरिवीक्षणसरोषकेसरिकिशोरकभयङ्करहुङ्कारैः अतिविशालपाषाणतलेष्वतिक्रोधेन सङ्घट्टयतां मत्तमहिषाणाम् उन्नत-विषाणकोण जनितात्युत्कटकठकठनिनदैः परिशोभितम्

परमेश्वरमिव मेनकारम्भितसेवोल्लसितमानसं मेरुगिरिमिव सुमनोविराजितं कमलासनानिवासमिव हरिगणोपेतं कालीयोरगमिव शिरोधृतविष्णुपदं, पाताललोकमिव नागशतसङ्कुलम् अन्तरिक्षमिव ऋक्षद्विजराजशोभितं बाणासुरदेहलीप्रदेशमिव पञ्चमुखाधिष्ठितं लङ्कानगरमिव कर्बुरोज्जृम्भितं क्वचिद्रजताचलमिव शिवाञ्चितं क्वचिदनङ्गकेतनमिव राजीवभासुरं क्वचिन्नन्दनवनमिव सुरसालाश्रयं क्वचिद्धृतराष्ट्रमिव सन्तानशतसमुज्वलं क्वचित्त्रैविष्ठपमिव वृषाश्रयं क्वचित् कालनगरद्वारप्रदेशमिव मदमहिषभीषणं क्वचित् अरुणरथमिव सप्तपत्रोपेतं क्वचित् राजशेखरमिव चन्द्रधरं क्वचिदर्जुनकेतनमिव वानराधिष्ठितं क्वचिदसुरारिमिव चक्रधरं क्वचित् उदयगिरिमिव स्फुरच्चित्रभानुं क्वचित् राजगृहमिव खड्गभीषणं क्वचित् कैलासस्थानमिव नदन्नीलकण्ठं, क्वचित् दुर्जनपतिमिव उज्जृम्भितरजसम् क्वचित् कुलीनमिव सद्वंशजातम् क्वचित् राघवयुद्धमिव कपिपलाशसङ्कुलं क्वचिद्भारतसमरमिव

In Public domain. Digitization Muthulakshmi Research Academy

स्तनकुलाडम्बरभासुरं क्वचित्तर्कवाक्यमिव धूमवानयं पर्वत इति वचनाश्रयं क्वचित् रावणनिवासमिव उपलाष्टापदलसन्तं क्वचित् सुभद्राचित्तमिव अर्जुनासक्तं क्वचित् पल्लमिव गणिकोज्वलं क्वचित् इन्दुमण्डलमिव निभृतशशकं क्वचित्सुकविरचितकाव्यमिव लसन्मन्दाक्रान्तभुजङ्गप्रयातं क्वचित् रावणसन्देशमिव रणच्छुकालापं क्वचिदायोधनोद्युक्तयोधमिव धृतकलापं क्वचित् युद्धतलमिव व्याप्तशरजालं क्वचिदमरकामिनीचरणरञ्जितलाक्षारसाङ्कितं, क्वचित् शार्दूलविदारितगोकुलं क्वचित् फणिफणाग्रस्थितमणिकिरणोद्दीपितकन्दरं क्वचित्प्रसुप्तकेसरिणं क्वचित् युद्धसन्नद्धकिटिकुलं ।

क्वचित् पुलिन्दसुन्दरी पदताडन कुसुमितवकुलं क्वचित् भिल्लपल्लवोष्ठीमधुरोष्ठविनिर्गतमधुधारासेचनघुमुघुमितपुन्नागम् ।

क्वचित्सौरनारीपीनपयोधरालिप्तकुङ्कुमसङ्कुमुदचन्द्रचन्दनपङ्काङ्कितसहकारम् क्वचित् गन्धर्वमिथुनरतिपरिमलगन्धिललतागृहं क्वचित् यक्षचञ्चलाक्षीसितनखशिखरविदारितकेतकीकुसुमं क्वचित् गरुडवरवर्णिनीकरकमलत्रुटित कुन्दमुकुलं क्वचित् चण्डालतुण्डभज्यमानचलदलविटपं क्वचित् मदवराहव्यूहचञ्चुपटलपाटितभूतलं क्वचित् मदलुलायतुङ्गशृङ्गाग्रसमुत्खातितसरस्तटं क्वचिद्वृषभानुगम्यधेनुकं क्वचित्कृष्णसारतुण्डकर्षणसुखितमृगीकुलसङ्कुलं क्वचित् भल्लूकभग्नवल्मीकं क्वचित् पञ्चास्यखरनखराहतकुम्भिकुम्भनिष्ठ्यूतरुधिरधारापूरसिक्तकाननं भूभृत्तिलकमपि मातङ्गकुलभूषितं सप्तपत्रोपेतमपि पत्ररहितं नलाश्रयमपि अनलाश्रयं भीममपि तालाङ्कं हिमगिरिं ददर्श ।।

In Public domain. Digitization Muthulakshmi Research Academy

यस्मिन्नूर्ध्वसरस्तटप्रदेशसञ्चरद्भिल्लसुन्दरीगीतारवाकर्णनेन कला-निधिगृहीतकुरङ्गः प्रमुञ्चति बाष्पकणानीव मुक्ताफलान्यनवरतम् ।।

यस्य शिखरावरोधात् वक्रमार्गगतेन भगवता लोकबन्धवेन भवन्ति दीर्घाणि निदाघकालेषु दिवसानि ।।

यस्मात् त्रिलोकजननी प्रभवति भगवती भवानी ।।

यस्मै भगवान् कमलभवः हविर्भागान् सुरैस्सार्धमदात् ।

येन गोरूपधराया धराया वत्सत्वमवलम्ब्यते ।। यं भागवान् परमेश्वरः तपश्छलेन सर्वमङ्गलापाणिग्रहणेच्छया समाश्रयत् तं तुषारधरमवाप महीशः ।।

नरपतिकुलचन्द्रः तीक्ष्णधारैः कदम्बैः
करिकिरिहरिखड्गान् हन्तुमारम्भमेत्य।।
गिरिवरमथ सार्धं नाम रोषारुणाक्षः
प्रकटयति सत्कृत्वा धावयन् वाजिरत्नम् ।।१५।।

एकैकबाणेन मदेभयूथान् वराहसङ्घान् सि(शि)तकुण्डलेन ।
खड्गप्रहारेण मृगाधिराजान् संहारयामास करालवक्त्रः ।।१६।।

सारङ्गशाबान् तुरगस्य तीक्ष्णैः खुरैर्हतानेव नरेन्द्रनाथः ।
निमीलिताक्षान् रुधिराङ्कितान् स्वानास्फालयमास विलोक्य वाहम् ।।१७।।

In Public domain. Digitization Muthulakshmi Research Academy

अपि च खेखोलमतिकठिनतरैः पार्ष्णिप्रहारैस्ताडयन् तद्घोर-गहनानि शून्यीकृतमृगानि कृत्वा स्वेदजलकणसिक्तावयवः फेनपटल-मुद्गिरन्तमश्वमालोक्य ईषदाकुञ्चितखलीनः तुरङ्गरत्नं निवर्त्य तरुण-सहकारच्छायायां स्थित्वा आहूय कुसुमशेखरमुक्तवान् ।।

इदानीं भगवान् कमलबान्धवः दिनलक्ष्म्याः हारनायकमणिरिव गगनतलमलङ्करोति । तुरङ्गस्तु अतिदाहपीडिततया रणरणकङ्करोति । अस्माकमपि अतिशीतलसरसि स्नानासक्तिरस्तीति उक्तवति क्षितिभृति कुसुमशेखरः प्रणम्य मुकुलिताञ्जलिरुवाच ।

अस्य प्रदेशस्यानतिदूरे सरोवरमस्तीति मन्ये, मार्गमध्ये अनेकपतुण्डगलित मृणालनालिकाभिः चक्रवाकमुखनगौकः कलकलरवैः विषाणकोणलग्नशैवालागत वनमहिषसमूहैरतिशीतल-शीकरसौरभसहितवातपोतकदम्बैः इत्यादीनि वाक्यानि श्रुत्वा कुसुमशेखरनिर्दिश्यमानमार्गः तुरङ्गाधिरूढः क्षितितलनाथः गमनसूचकं पार्ष्णिप्रहारं कृत्वा चन्दनतरुवीथीमार्गेण गच्छन् प्रान्तानोकहनिवहसुम मरन्दबिन्दुबृन्दार्द्रीकृतैरेव वनमहिषविषाणमण्डलसमुत्खातितप्रदेशैः। क्वचिद्दन्तावलदन्तघट्टनझर्झरितमूलभागाङ्कितार्जुनतरुभिः क्वचित् द्राक्षा-लतापिहितसहकारैः क्वचित् मल्लिकावृतकाञ्चनैः क्वचिदेलाल-ताच्छादितपुंनागैः क्वचित् ताम्बूलवल्लीविराजच्चन्दनैः क्वचित् परिणतफल-भारावनम्रशाखाञ्चितशाखिभिस्तटैः परिवृतं कुमुदकुवलयकमलकेसर-जालैराच्छादितैरेव काञ्चनमयैरिवोल्लसत्सैकतैः कोकनदसमुदयप्रभाजाल-

In Public domain. Digitization Muthulakshmi Research Academy

द्विगुणीकृतदेवभामिनीकुचलिकुचानुलिप्तकुङ्कुमरसपूरेण अरुणित-मधुरसलिलपूरैः मदकरिदानधारामोदमिलत्कञ्जातपुञ्जपरिमलेनानन्द-यद्विरेफगीतारवैर्विराजितं नारायणदोरन्तरालमिव कमलाश्रयं चन्द्रशेखर-करतलमिव राजीवाङ्कितं धनपतिभाण्डागारमिव मरकतशङ्खकच्छ-पोद्भासितं कुसुमशरकेतनमिव मीनोपेतम् सुधानिधिमण्डलमिव अमृतपूरितं राजकान्ताकपोलद्वयमिव मकरिकोज्वलं नलिनभवनगरमिव परमहंससेवितं क्वचित् स्नानार्थमागतमुनिजनगृहीतवनजं। क्वचिद्विल्ल-पुरन्ध्रीपयोधरविलिप्त मृगमदवासितं क्वचित् मदकरिकराक्षिप्तमृणालं क्वचिद्राजहंसचञ्चुपुटखण्डित बिसकिसलयं द्विजाधिराजाधिष्ठितमपि विकसितकमलं परमहंससेवितमपि कुवलयानन्दकरं किमपि सरोवरं ददर्श ।।

संवीक्ष्य च तुरङ्गादवतीर्य पल्याणमाक्षिप्य मधुरसलिलपूरेण विगतदाहं कृत्वा अञ्जलिजलैः पत्रं फेनपटलमुपहृत्य कनकखलीनेन चन्दनद्रुममूले बन्धयित्वा कुसुमशेखरद्वितीयस्सर्वसहानाथः स्नान-पानाभ्यामपनीय अध्वखेदम् अम्भोजानि करतलेन उपस्पृश्य विलोक्य कैरवाणि छित्वा बिसकिसलयानि पुण्डरीकमरन्दबिन्दूनास्वाद्य मृणाल-जालान्यलङ्काराणीव कृत्वा मुहूर्तमिव तस्मान्निर्गत्य तुरङ्गस्यानतिदूरे रसालविटपिच्छायायां कुसुमशेखरविरचितपल्लवशय्यायां निषण्णोऽभूत्।।

ततः कुमुदमुकुलकान्तिना दन्तजालेनोपेतः नवरसालपल्लवोल्ल-सज्जटाकलापः तारकामलस्फटिकमालावृतकण्ठभागः अत्यायतनेत्र-

In Public domain. Digitization Muthulakshmi Research Academy

युगलः कल्पतरुवल्कलपरिवृतकटिप्रदेशः सितभस्मरेखात्रयलसल्ल-लाटफलकः अतिदीर्घबाहुद्वयः बिसतन्तुसितयज्ञोपवीतः द्वितीय-कमलबान्धव इव विराजमानः प्रभाजालेन, सकलविद्यापारङ्गत-तया भगवता चतुराननेन श्लाघनीयः षड्रिपूणां विजेता, निवासपदं शान्तरसस्य आकरस्सकलधर्माणाम् कलङ्करहितकुमुदबान्धव इव आह्लादकरस्सर्वलोकानाम् तृतीये वयसि वर्तमान इव स्थितः तपःप्रभावेन पुरातनोऽपि सुमुखो नाम तपोधनः शिव, भव, महादेवेति भगवतः साम्बमूर्तेः नामानि वदन् नखमयूखनिकरविराजत्स्फटिका-क्षमालां भ्रमयन् सव्यकरेण, सरोवरमागत्य कृतस्नानः भगवते नभोमणये अर्घ्याञ्जलिं दत्वा स्वनिकेतनं प्रतिगच्छन् महीपतिमद्राक्षीत्।।

संवीक्ष्य कोऽयं केन हेतुनागतः कस्य दारकोऽस्मिन् प्रदेशे निवासस्य किमिति वितर्कयन् तत्समीपं प्राप्तवति तपोधने पल्लवशय्यायास्समुत्थाय मुकुलिताञ्जलिः प्रणम्य महात्मन् चन्द्रचूड इव मम दृष्टेराह्लादकरोऽसि त्वद्दर्शनेनैव विमलतरमभून्मे मनः सकलमुनिनुतप्रभावाय तुभ्यं नमो नम इति वदन्तमवनीपति-मवदत्तपोधनः ।।

कस्त्वं सुतः कस्य निवासभूमिः
कस्मिन् प्रदेशे क्रियते किमर्थम् ।
पदं त्वयेत्युक्तवतीत्युवाच
प्रजानाथस्सुमुखे मुनीन्द्रम् ।।१८।।

In Public domain. Digitization Muthulakshmi Research Academy

अहं करालवक्त्र इति मञ्जनकेन सङ्गरोन्मुखनाम्ना क्षितितलनाथेन दत्तसंज्ञोऽस्मि भुवनविदिते केरलदेशे हेमवती नाम नगरी मम निवासभूमिः मृगयाकुतूहलेन काननेषु एषु चिरेण सञ्चारादतिदाह-पीडितेन मया इदं दृष्टं सरोवरम् अध्वखेदापहाराय निषण्णोऽस्मि इत्युक्तवति करालवक्त्रे तमुक्तवान् तपोधनः

तातं ते दिगधीशसन्नुतगुणप्रख्यातशौर्योज्ज्वलं
पद्माक्षाङ्घ्रिसरोजयुग्मभजनानन्दन्मनःपङ्कजम् ।
वैरिक्ष्मापतिगर्वभञ्जनरतिं विप्रोत्तमैः सन्नुतं
जानीमस्सरसाग्रगण्यमखिलक्ष्मापालरत्नं वयम् ॥१९॥

यः परदारावलोकने विमुखः परनिन्दाश्रवणे बधिरः धर्माधर्मविवेक-समवर्ती। कुवलयरञ्जने कलानिधिः स राजा अस्मद्दयावलोकनस्य पात्रं भवति ॥

एते गुणास्सन्ति महीपते ते ताते प्रजारञ्जनदत्तचित्ते ।
तस्मात् मदीयं शृणु वाक्यमेकं शुभप्रदं निश्चलमानसेन॥२०॥

आकरस्सकलदोषाणाम् उदयो यौवनस्य पावकमिव पवनः प्रेरयति लक्ष्मीमदो यौवनम् राज्यलक्ष्मीमदश्चेत्किमुत, अनिर्वाच्यमेव गर्भैश्वर्यं चेत् अत्युत्कटैश्वर्ययौवनमदान्धेन अदृश्यते अल्पमपि शास्त्रज्ञानं न पदं करोति कुसुमशरशरनिकरवेदनानलकीलाकलापदन्दह्यमानमानसे पुरुषे अनलपरितप्तलोहे जलकण इव सुगुणलेशः कठोरसायका इव विशन्ति श्रवणविवरयोः सज्जनालापा यौवनमदमत्तस्य विमलमपि

In Public domain. Digitization Muthulakshmi Research Academy

श्मश्रुरेखया सह नैल्यमुपयाति मनः भवति बाह्यान्तरालेन सह अधिका प्रमदासक्तिः मध्यभागेन सह अल्पत्वमुपयाति गुरुविनयः शृङ्गार-चेष्टाभिस्सह प्रवर्धते पल्लवजनेषु प्रेमातिशयः अमृतमयानीव आनन्दमयानीव मरन्दमयानीव श्रूयन्ते कामिनीवाक्यानि, मदनज्वर-पीडितस्य सर्वाणि भवन्ति महायासकारीणि ।।

तथाहि - प्रज्वलच्छिखिशिखाकलाप इव करोति बाधां महतीं कुवलयाह्लादकरस्य हिमांशोश्चन्द्रस्य अमृतमयकिरणजनितज्योत्स्नापूरः अन्तर्विलीनकुसुमेषु वह्निमिव प्रज्वलीकर्तुमिच्छुर्विजयति मलयज-गन्धवहः, धैर्यं त्यज अस्मत्प्रभुः भगवान् मकरकेतुः शरशरासनधरस्सन् आसीदागन्तुमुद्युक्त इति तर्जयन्त इव श्रूयन्ते शुकपिकालापाः शिलीमुखाः शिलीमुखा इव साध्वसमुपपादयन्ति मधुपानमदेन झङ्कारकारिणः ।।

किमुत कुसुमशरसायकानां कुसुमानां माहात्म्यम् । अतिशीत-लोऽपि विजितपावको भवति चन्दनरसविलेपः खड्गप्रहारा इव अवयवेषु लगन्ति शय्यायां पल्लवनिकराः, स्थानात् समुत्सर्पयन्ति प्राणान् कदलीदलानिलाः ईदृगवस्थाभाजनं पुरुषः न कुलं विचारयति न स्मरति यशसाम् न गणयत्यपवादान् न विलोकयति हसतो जनान् न परलोकभयं मन्यते। सोन्माद इव सापस्मार इव पिशाचग्रस्त इव मृत्युगृहीत इव प्रकटितविकारो भवति ।।

In Public domain. Digitization Muthulakshmi Research Academy

विजितेन्द्रियाणामेव महतां मनः तपोधनानामपि प्रचलीकर्तुं भवति समर्थमेकैकं प्रत्येकमेव पुष्पवनपवनशुकपिकचन्द्रादीनाम् धनयौवनमदान्धानामवनीपतीनामेतेषामरिष्ठकारीति किमुतायं समुदायः विद्वज्जननिन्दितेषु मृगयाक्षपानादिषु आसक्तमनुसरति पुरुषमङ्गनामोह-स्सहचरत्वात् ।

पदानि प्रमदानामिमानि दृक्प्रसारविजितसुमशरासनशराणाम् अमृताशनानां विहारस्य वनानि लावण्यजितक्रतुभुक्कान्ताः कान्ताश्चक्रुः काननेषु निवासमेषु भिल्लानाम् ।

किं बहुना सुजनदुर्जनयोरुपदेशवाक्येन -

तस्माद्वनानि त्यज न त्यजेमं हितोपदेशं नरनाथपुत्र ।
ददातु चन्द्रार्धधरः शिवस्ते शुभं दयार्द्रीकृतहृत्सरोजः।।२१।।

इत्युक्त्वा तं नरपतिम् इदं षड्रिपूणां विजेता
शम्भोः पूजां भगवत अगात् कर्तुमात्मीयवासम् ।
पश्चाद्राजा चकितनयनां भीतसारङ्गवत्सां
अद्राक्षीत्तामनुद्रुतगतिं सर्वदिग्दत्तदृष्टिम् ।।२२।।

संवीक्ष्य सकललोकनिर्माणकुशलेन भगवता चतुराननेन स्वशक्ति-मिच्छता प्रकटीकर्तुं निर्मितेयम् -

उत भगवतो मीनकेतनस्य मायारूपधारिणीयं हरिणी मोहकारिणी सर्वजनानामिति वितर्कयन् तद्ग्रहणेच्छां मनस्यकरोत् ।।

In Public domain. Digitization Muthulakshmi Research Academy

ततस्सर्वतो दत्तदृष्टिः तद्ग्रहणेच्छाकुलितहृदयः कतिपयपदानि गत्वा नातिदूरे पनसघनसाररसालमुखनिखिलमहीरुहमध्यभागे कामपि प्रभामालोक्य तटिल्लतादीधितिरिति चेत् नोत्पत्तेरयं कालः रत्नानां पद्मरागाणां निकरस्य कान्तिरिति चेत् तत्र तेषामसङ्गतं स्थितेरिति वितर्कयन् कुरङ्गीग्रहणेच्छाया अधिकया तत्प्रभालोकनस्य आसक्त्या तस्यां दत्तदृष्टिः कतिपयपदानि गत्वा कुन्दमुकुलपरिमलमिलन्नव-मृगीमदामोदमेदुरानिलशिशुप्रसारेण द्विगुणीकृतोत्साहः तद्वनमवाप।

ततस्सुरपतिमणिगणघणि(ण)विराजत्केशकलापनिहितचन्द्रशकलाकार दन्तपत्राम्, सीमन्ताभरणेन प्रोज्वलेनेव श्रमजलकणेन कलितफालतल-सुधाकररेखोल्लसन्तीम् नयनकमलयुगलाद्वीक्षण मधुकर पटलान् विकिरन्तीम्, लावण्यरसबिन्दुममलमुक्ताफलमणिमिव चम्पकोद्भासितया नासिकया वहन्तीम् तिर्यक्प्रसारितवदनतया प्रतिबिम्बितेन ईषदा-कुञ्चितसव्यकरकमल निभृतशुकशावेन समुल्लसद्वामेतरगण्डभागाम् मदनविजयशङ्खशङ्काकारिकन्धरे विलिप्तचन्दनरसां कुमुदमृगीमद-वासिताम्, नवकुन्दमुकुलमालाकलित पृथुपयोधरभारावनम्र-पूर्वेशरीरातिवामाम्, निजभुजावालोक्य अनुसरन्तं मयूर शाबं कुटिलां भ्रुकुटीं कुर्वतीम्

नाभिचक्रान्निर्गतयेव अनङ्गकृपाणलतिकया स्थितया द्विरेफ-कान्त्यारोमराज्या विराजितमध्यभागां निजजघनजितचक्रसैकतविलासाम् कुसुमबाणासनतूणाकारजङ्घद्वयां सौगन्धिकमृदुलचरणयुगलां खनिं

In Public domain. Digitization Muthulakshmi Research Academy

सौन्दर्याणाम् निवासभूमिं विभ्रमाणाम् पदं मदनविकाराणां कान्तां कामद्राक्षीदवनीशः।।

यस्याः पार्ष्णियुग्मस्य सादृश्याभावात् भिन्नत्वं प्राप्नोति न्यग्रोधः क्रोधेन।।

यस्याश्चरणनखैः कुर्वन्ति मैत्रीममलानि नक्षत्राणि, यस्यास्सञ्चरन्ति गुहोदरेषु मध्यभागेनैव निर्जिताः साध्वसव्याकुलाः केसरिणः।।

यस्यास्सम्भवन्ति कार्मुकाणां भ्रुकुटिद्वयाद्गुणाक्षेपाः, यस्याः क्रमेण कृशत्वमाननसरोजस्य दृष्ट्वा सौन्दर्यमवाप लज्जया राकासुधाकरः।।

यस्याः तनुलतायाः कान्तिः चामीकरमुदीर्य व्यर्थसुवर्णाभिख्यं न्यक्कृत्य प्रकृतिचञ्चलां चञ्चलां दीव्यत्यनवरतम् तस्यास्समीप-मगमन्महीश्वरः ।।

सा विद्रुमोष्ठी वसुधेन्द्रचन्द्रं
व्रीडाभरादानमिताननाब्जा ।
अपाङ्गजालैः मदनास्त्रतीक्ष्णैः
ददर्श रोमोद्गममङ्गकम्पम् ।।२३।।

तद्दृक्प्रसारेण कपोलयुग्मात्
महीपतेः स्वेदजलस्य बिन्दवः ।
स्रवन्ति दृग्भिस्सह चञ्चलाक्ष्याः
पपात तस्मिन् मदनास्त्रजालम् ।।२४।।

In Public domain. Digitization Muthulakshmi Research Academy

पुष्पेषुबाणैर्नृपचन्द्रसूनुः
विकम्पितस्वान्तसरोज एव ।
युक्तश्च नायुक्तमवेक्ष्य कान्तां
इदं बभाषे स्मरदारकान्ताम् ॥२५॥

नितम्बिनि त्वं वद देवतानां
नितम्बिनी वा वनदेवतानाम् ।
अदृश्यमानौ त्वयि दीव्यतस्तौ
विलासलावण्यरसौ नरेषु ॥२६॥

त्वत्पाणिपद्मे वसतः प्रवक्तुं
शुकस्य भाग्यं न समर्थ एव ।
शेषो हि पूर्वे कृतकर्मणस्तु
फलं बभूवाद्य मनोहराङ्गि ॥२७॥

किमहो कुन्दमुकुलानाञ्च भाग्यं कण्ठभागे तव विलिप्तमृगमदामोदेन च पद्मकुड्मलशङ्काकारि पयोधरविहारेण च आमोदितानां तलोदरी शिरीषकुसुमपेशलं शरीरमायासयिष्यसि, किमर्थममलमरन्दबिन्दुसन्दोहं श्रमजलकण इव स्रवति मुखकमलात् जनेऽस्मिन् पूरयितुं स्थिते मनोरथं अलमायासेन महता। कष्टमिमं द्रष्टुमसमर्थोऽयं जनः न जानात्यायासं किं वल्लभस्ते यस्समर्थः पदं प्रेमातिशयस्य जीवादुपेक्षितुं दारान् किं बहुना वृत्तान्तं कथयते ।

In Public domain. Digitization Muthulakshmi Research Academy

किं नाम ते कस्य जनस्य पुत्री
मुखे निमित्तं श्रमवारिणः किम् ।
वदन्तमित्याह करालवक्त्रं
विहस्य किञ्चित् जलजातगन्धिः ॥२८॥

युष्मत्कुलं नामनिवासभूमी
नोक्त्वा विदग्धत्वमहो शुकत्वम् ।
वृत्तान्तमस्या इति बोद्धुमिच्छा
वदामुमित्युक्तवतीं बभाषे ॥२९॥

किमहो कमलभवस्य सृष्टिः श्रियोपयुक्तानामेव घटति श्रियं महतीम् त्वत्करकमलनिवासस्पर्शोल्लसच्छुकशाबमेव मधुरालापकलापेन आमोदयसि तमेव चुम्बसि पुनःपुनः, त्वत्सुधामधुरवाक्यश्रवणकुतूहलिनं किंमर्थं मां न मानयसि तवाधीनं मुकुरकपोलयुगले अस्य शृणु वृत्तान्तम् ।

आसीदशेषधराधुरन्धरः सङ्गरोन्मुखो नाम नरपतीन्द्रः तस्य नन्दनोऽयं जनः, करालवक्त्र इति प्रसिद्धः, मृगयायां व्यसनितया आगत्य काननानि कृत्वा वनविहारं गत्वा सरोवरं पीत्वा तज्जलं विश्रम्य तटप्रदेशे संवीक्ष्य तपोधनं श्रुत्वा तस्य वाक्यानि दत्वा सर्वतो दृष्टिं दृष्ट्वा बालहरिणीम् अवाप्य तद्ग्रहणेच्छां अनुसृत्य तन्मार्गम् आलोक्य दीधितिम्, आघ्राय कुन्दपरिमलम् अथ सकलशृङ्गारखनिं त्वामद्राक्षम् ।

In Public domain. Digitization Muthulakshmi Research Academy

कटाक्षजालैर्भ्रमरोल्लसद्भिः विलोकयेमं जनं अब्जनेत्रे ।
कुरु प्रियैस्त्वं मुदमस्य वाक्यैः वदन्तमित्याह तटिल्लताङ्गी ।।३०।।

पृथ्वीश्वरावङ्गजकन्यकानां अयुक्तमन्यैर्वचनं कदाचित् ।
तथापि वार्तां शृणुतेति कान्ता करालवक्त्रं मधुरं बभाषे ।।३१।।

अस्ति समस्तभिल्लजनानामधिपतिरग्रेसरश्शूराणां वसन्तो नाम महाबलः।।

यस्य मण्डलाग्रादनवरतमिभकुम्भेष्वामिषं तदैव ग्राह्यमाणकण्ठीरव कण्ठच्छेदलग्नैः मौक्तिकैः प्रकाश्यते ।

यस्य प्रकोष्ठयुगलमवाप्य गुणात्पारुष्य (सायकान्) कान्कार्मुकस्य विकिरतः खड्गमृगान् दीव्यति ।

यस्य शासनं गहनवासिनः पुलिन्दमुखसमस्तजनाः वहन्ति मस्तकेषु ।

तस्य वहन्तीं कलिकेत्यभिख्यां दन्तखेटनाम्नः पुत्रीं भिल्लस्य पाणिग्रहणं चक्रुः कुलवृद्धाः ।

पश्चात्कलिकया सह वसन्तः चिक्रीड चिरेणोपवनेषु द्राक्षा-लतापिहितसहकारनिकुञ्जेषु यूथिकाच्छादितघनसारतलेषु गिरिकन्दरेषु सरोवरेषु येषु मनोहरप्रदेशेषु अनवरतम् ।

क्रीडाविनोदेन गमयित्वा कतिपयवत्सरान् अनुपलब्धसन्तानतया व्याकुलितस्वान्तोऽभूत् ।

In Public domain. Digitization Muthulakshmi Research Academy

पश्चात् कस्मिन्दिने त्यक्ताहारविधिस्सर्वजनेषु स्वपोषितकुरङ्ग-शुकपिकमुखनिखिलमृगखगनिवहेषु च निहितक्रोधदृष्टिरतिकष्टेन गमयित्वा दिवसं आकुञ्चितवदनः कलिकामुत्सृज्य स्वशयनागारमधिगम्य दोलायमानमानसेनोपयुक्त एव किं करोमि कं पृच्छामि केनोपयेन कार्यसिद्धिः कस्मै दुरवस्थामिमां वक्ष्यामि इत्यनेकवाक्यान्युक्त्वोक्त्वा विरराम ।

मुहूर्तमिव स्थित्वा इति निश्चितवानभूद्वसन्तः ।

अन्यैस्सुरैर्दुर्लभमस्ति देवी
मनोरथं पुरयितुं समर्था ।
श्रीचण्डिकाख्येति विचार्य चित्ते
तत्पादपद्माश्चितभक्तिरासीत् ॥३२॥

तद्ध्यानासक्ततया यामावधावब्जहितोदये स्थिते निजमातरमाहूय सनालिकाभिख्यामित्युवाच ।

जननि श्रोतव्यमिदं त्वया इदानीमेव प्राप्तवतस्सुप्तिं मम स्वप्ने श्रीचन्दनालङ्कृता कुसुम्भाम्बरावृतमङ्गलाङ्गी मञ्जुमञ्जीरझणंझण-निनादमेदुरपादकमला, कर्णपत्रकण्ठाभरणकङ्कणाङ्गदाङ्गुलीयककाञ्ची-मुखानेकालङ्कारखचित मणिगणप्रभाप्रभासिता, अवतंसीकृतकलानि-धिकलाकलापाभिरामा, धराधरकिसलयप्रभया अरुणीकृतमेव नासिकया अब्जरागशङ्काकारिमुक्ताफलमुद्वहन्ती नामश्रवणनिहित-कुमुदमपाङ्गजालेनेव इन्दीवरं कुर्वन्ती घुमुघुमायमानपारिजात-

In Public domain. Digitization Muthulakshmi Research Academy

कुसुममालयोल्लसन्ती देवी कटाक्षामृतधराभिर्मां परिषिच्य वत्स त्वन्मनोरथसिद्धिः भवत्विति सुकुमारशुभाकारया पुत्रिकयेत्युक्त्वा अदृश्यमानाभूत् ।

श्रुत्वा तस्य वाक्यानि मुदितमानसा सनालिका कुमारकमाह।।

आयुष्मतः तव देवीप्रसादलब्धवरस्य मनोरथसिद्धिर्भवत्येव तात त्वमपि देव्याः प्रसादेनैव लब्धोसि अतः कुलवृद्धैः अस्मदीयैः प्रपूजितां देवीं अर्चयितुमुत्सुको भवेत्युक्तवतीं प्रणम्य मातरं अथ निर्वर्तित-कालोचितक्रमः पूर्वधराधरशिखरमारूढे भगवति सवितरि पूजार्हद्रव्या-ण्यादाय ससम्भ्रमः प्रयाणोन्मुखो देवीगृहमभूत् ।

ततः प्रयाणोन्मुखमात्मानमाहूय सविनयं ससम्भ्रमम् आयुष्मन् कलिकया सह भजस्व देवीं इत्युक्तवत्याः सनालिकायाः वाक्यान्यङ्गी-कृत्य अमन्दपिचुमन्दाश्वत्थमुखतरुशाखान्तरालेष्वधिष्ठितानां चलत्पत्र-पुटानां पत्ररथानां मांसपिशुनानां करठादीनां विरुतैश्च क्वचित्खण्डितानाम् आलब्धत्रिचतुर्वत्सराणां मदमहिषाणाञ्च सविषाणानेकोत्तमाङ्गैश्च क्वचिन्मेषकण्ठनिष्ठ्यूतरुधिरार्द्रीकृतभूतलैश्च क्वचित् विगतप्राणैरेव राशीभूतैः पदायुधैर्निमीलितनेत्रैश्च क्वचिद्विटपिमूलसम्बद्धानां हरिद्राङ्कित फालतलानामजानां ससाध्वसानामेव त्यक्ताहाराणामत्युत्कटरवैरित-स्ततस्सञ्चरद्भिः लम्बमानजिह्वाग्रैः कृतज्ञैश्च एकैकस्य पदमागतानां कलरवाणां पर्णनिनादैः गुग्गुलुधूमवासितकुड्यभागनिहितातपत्र-कलापिकलापैरुपेतस्य द्वारमधिगम्य देवीगृहस्य कुङ्कुमाङ्कितफालतलीन-मधिकया जरयाक्रमित वपुषमेव, अल्पैरतिधवलैरतिवामनैः विशीर्णैः

In Public domain. Digitization Muthulakshmi Research Academy

शिरोरुहैः कलितोत्तमाङ्गसंवृतजीर्णांशुकम् आगलन्त्यारदनरहित-वदनाल्लालयाञ्चितदोरन्तरालं वामकक्षप्रदेशनिहितमयूरकलापम् कतिपयैः पिचुमन्दशाखाग्रैः व्याकीर्णैः कुङ्कुमहरिद्रयोश्चूर्णैरञ्चितदा रुपात्रमुद्वहन्तं वेत्रलताञ्च सव्यकरेण स्फोटकेन भग्नवामगुल्फतया शनेश्शनैः स्वदर्श-नार्थमागतमालोक्य पूजाकारकं देव्याः किञ्चिद्विहस्य गर्भागारमगात्।।

पुष्पैः फलैः कुङ्कुमचूर्णगन्धैः कदम्बपत्रैरमितैस्सरोजैः ।
कर्पूरदीपैर्हिमवारिपूरैः चकार पूजां समुदं वसन्तः ।।३३।।

दिक्पालकञ्जातदलायताक्षी फालस्थसिन्दूरलसत्पदाब्जे ।
वाञ्छां कृपार्द्रीकृतहृत्पयोजा दत्वा मुदं मे कुरु कञ्जनेत्रे।।३४।।

हस्ताग्रसंस्थापितमण्डलाग्रां भजाम्यहं भक्तमनोऽब्जभृङ्गीम् ।
चन्द्रार्धकान्त्युज्ज्वलमस्तकां त्वां मञ्जीरमाणिक्यविराजदङ्घ्रिम् ।।३५।।

जलदपटलवेणीं चारुकञ्जातपाणिं
बुधवरनुतिपात्रं भूमिभृद्राजपुत्रीम् ।
नलिनरुचिरनेत्रां नौमि कल्याणगात्रां
रजतधरनिशान्तां राजबिम्बास्यकान्ताम् ।।३६।।

वन्दे रत्नकदम्बनिर्मितलसत्काञ्चीरणद्वण्ठिकां
वन्दे शङ्करवामदेहनिलयां वन्दे धनुर्भ्रूलताम् ।
वन्दे विद्रुमपल्लवच्छविलसद्दन्तां शुकोद्भासिनीं
वन्दे रक्षितसर्वलोकनिकरां वन्दे जगन्मातृकाम् ।।३७।।

Digitization Muthulakshmi Research Academy

नमस्ते भक्तसुलभे नमस्ते करुणाकरे ।
नमस्ते सिंहतुरगे नमस्ते शङ्करप्रिये ।।३८।।

इतीरयित्वा स निमीलिताक्षः कृताञ्जलिः बद्धमतिर्बभूव ।
तदञ्जलौ मोदितमानसा सा प्रसादयामास सुमं भवानी ।।३९।।

शनैः शनैः पश्चिमदत्तपादः
तथा मुदा सञ्चरितान्तरङ्गः ।
इतस्ततस्सन्निहितात्मदृष्टिः
जगाम गां द्वारतलस्य भिल्लः ।।४०।।

ततः पूजाकारकमालौक्य तस्य पटादिनोपायेन कृत्वा मुदमात्मालय-मागम्य कलिकया सह प्रणम्य चरणयुगलमम्बायास्सानालिकाया निजतरुणीहृदयं क्रीडया समुदं कृतवान् ।

पयोधरद्वन्द्वकपालयुग्म
श्रोण्यादिषु व्याप्तमनोहरैश्च ।
प्रकाशते गर्भजलक्षणैस्सा
श्वेतानना भिल्लसरोरुहाक्षी ।।४१।।

यथाक्रमं भिल्लसरोरुहाक्ष्यां
यथायथा गर्भजलक्षणानि ।
आसन्महान्ति प्रथिता बभूवुः
तथा वसन्ते मुद आत्मजन्याः ।।४२।।

In Public domain. Digitization Muthulakshmi Research Academy

गृहेषु सौजन्यदृशा कदाचित्
परस्परं शोभनमीक्षितेषु ।
असूत कल्याणगुणाभिरामां
सोमानना भिल्लवरस्य पुत्रीम् ।।४३।।

जाता शुभाङ्गी जलजातनेत्रा
श्रुत्वा च वाक्यं तव पुत्रिकेति ।
तरङ्गकल्लोलजलेश्वरस्य
प्रकाशते चन्द्रिकयेव मुद्भिः ।।४४।।

दशस्वहस्सु भद्रेण स गतेष्वात्मपुत्रिकाम् ।
मञ्जरीत्यकरोन्नाम दृष्ट्वा भिल्लजनाधिपः ।।४५।।

वसन्तश्रिरेण संलब्धसन्तानतया देवीप्रसादजनितामेव सुतां एकामत्यादरेण रक्षन् तच्चेष्टाभिरभिनन्दितस्वान्तः कतिपयवत्सरान्निवर्त्य प्राप्तयौवनां पुत्रीमालोक्य परिणयकरणोसुकोऽपि निजकुलानुकूल-विक्रमावक्रगुणगणेज्वलजामातृसमन्वेषणं कुर्वन् डोलायमानमानस तस्थावित्युक्त्वा च त्रपाभरात् क्षणमवाप्य मूकीभावं भयसम्भ्रम-विलोडितमानसा कपोलतलगलितश्रमजलकणान् विकिरन्ती नखाग्रैः गद्गदस्वनेनेत्युवाच ।

या मञ्जरी प्रसिद्धाभूत्सेयमेव मनोहर- ।
मदालीज्ञातवृत्तान्तमानुपूर्वं निवेदितम् ।।४६।।

In Public domain. Digitization Muthulakshmi Research Academy

अपि च उपवने क्रीडन्तीयं विलोक्य बालहरिणीं तां ग्रहीष्यामीति बुद्ध्या मामेति सखीभिर्निवारितापि तया सह चिरेण सञ्चारेण जातं श्रमजलम् यया अत्यायासः प्राप्तो मे सैव खलु मोहं युष्माकमपि चकारेत्युक्तवत्यां मञ्जर्यां आलीढपादस्थेन पुष्पसायकेन मण्डलीकृत-शरासनेन प्रमुक्तसितकाण्डपरम्परा विकम्पितहृदम्बुजातः परित्यज्य अलङ्कारभूतं धैर्यं परलोकभयमाक्षिप्य मुनिवचनञ्च त्रपामवाप्य तत्क्रीडासक्तिमित्युक्तवान्नरपतिः ।

अयि विलासिनि मयि स्मितकटाक्षान् तव विकीर्य दुर्विक्रमो-ज्वलेन पञ्चशरेण प्रोक्षिप्तशरनिकरान्निवर्तय। पक्वबिम्बिकाफलोष्ठि, सुधामधुरेण तवाधरेण परितोषय मे रसनाम् । पद्ममुकुलोल्ल-सत्पयोधरयुगलो मामुपगूहनेन त्वगिन्द्रियस्य कुरु महत्सुखम्, त्रिलोकाभिरामे। त्वद्दर्शनेन चक्षुरिन्द्रियस्य प्रीतिमसि दत्ताधिकाम्।

रसालकिसलयग्रासमदमत्त कोकिलालापेमधुवर्षिभिः श्रोत्रेन्द्रियस्य वाक्यैर्मुदं दद। कमलवदने मदनकदनश्रमजनितनिश्वासमारुतैर्मम घ्राणेन्द्रियमानन्दयेत्युक्तवति नरपतौ अति त्वरेण काचिन्नितम्बिनी तत्पदमागच्छत्।

अयि मञ्जरि, शृणु त्वज्जननीवाक्यानि त्यक्त्वा सखीजनान् कुरङ्ग्या सहागमनं अहो त्वज्जनकः क्रुध्यति किंत्वच्चेष्टाश्रवणेन तवास्ति चेत् कुरङ्ग्या सह क्रीडासक्तिः कोचटस्तस्या आकर्षणं न करोति किम् ।

In Public domain. Digitization Muthulakshmi Research Academy

अपिच - यानि भवन्ति मनोहरकारीणि, तानि गृहीतुं स्थिते भटनिकरे किमर्थमायासः त्वया इदानीमेव प्राप्तव्यमात्मनिकेतनमित्युक्त्वा तस्याः करकमलमवलम्ब्य तस्मान्निवर्तयामास ।

सा च मुहुर्मुहुश्चरमभागनिहितात्मदृष्टिः पथि कुसुमशाखावरोधच्छलेन च मुखकमलपरिमलार्थं भ्रमद्भ्रमरकलापसरणापह्नवेन च क्षितिपतिमवलोकयन्ती तल्लग्नवीक्षणैव सन्त्यक्तमार्गप्रदेशा सख्याः कोपतिरस्कारहासपूर्वाणि वचनानि श्रुत्वा तदनुकूलप्रत्युत्तरं वदन्ती शनैश्शनैरतिकष्ठेन आत्मभवनमगात् ।

नरपतिरपि दीर्घतरनिश्वासं कृत्वा शून्यीकृतान्तःकरणः स्थित्वा मुहूर्त-मिवालोक्य कुसुमशेखरं अहो कमलभवस्योद्यमः क्व च हेमवती हिमधराधरः क्व भगवतस्सुमुखस्य वाक्यानि श्रुत्वा किमर्थमत्रैव पदं करिष्यामि हरिणीग्रहणोत्सुकः किमर्थं जातः कुरङ्गीहतकया किमर्थमनुचरोऽस्मि सा किमर्थमङ्गनावयवप्रभाप्रभासदुपवनमगात् - तत्र कान्तावलोकनेन किमर्थमभूत् तत्क्रीडासक्तिः मयि कान्तामुक्तवति दुर्वार्तामादाय युक्तायुक्तविवेकशून्या सा पापकारिणी दुष्टस्वभावा आगत्य किमर्थं शृङ्गारवतीं स्वनिकेतनं प्रापयामास । न कदाचिन्मञ्जरीक्रीडासुखानुभवोऽस्त्येव तद्दर्शनमपि दुर्लभम् अतः प्राणान् धारयितुमशक्योऽयं जन इत्युक्त्वा मुक्ताफलशङ्काकारान् अश्रुबिन्दून् प्रमुच्य कुसुमशेखरदोरन्तराले समुत्क्षिप्य निजबाहुयुगलं पपात ।

In Public domain. Digitization Muthulakshmi Research Academy

कुसुमशेखर आकुलिनः प्रभोः
करयुगं परिगृह्य विभूषितम् ।
कनककुम्भविराजितमायतं
पटगृहं क्षितिपं स निनाय तम् ॥४७॥

तत्रानेकरत्नखचितदन्तखट्वोपरि कुसुमरचितमृदुलशय्यायामवनीपतिं निषण्णं कृत्वा राजकुलललाम क्षत्रियाणामनुचितं त्यज दैन्यमिदं तरुणकिसलयविराजमानमधरं करोति किमर्थं निश्वासमारुतैः अत्युष्णैर्ग्लानिं शय्यायां निपतितानि हारकङ्कणाद्यलङ्कारजातानि गलन्तीनि विलोकय अवयवेभ्यः धीरस्याबालमविरुद्धस्तवाङ्गकम्पोऽपरिमित महामहीरमणमकुटमणिकिरणगणं धगद्धगितपदकमलस्य सुन्दर्यस्तव कुत्र न सन्ति । अपि च प्रकृतिसुभगमालोकयन्त्याः त्वां अङ्गनायाः चित्तमनङ्गसितशरपरम्परया झर्झरितं किं न भवति अतः सम्भवति मञ्जरीक्रीडाविनोद इत्युक्तवति कुसुमशेखरे समयभामिनीपाणितलगलितकमलरागरचित कन्दुक इव अपरपयोनिधौ पपात पद्मबान्धवः॥

कामेन निक्षिप्तसितास्त्रमब्जः
प्रकाशते वह्निकणः स्फुरच्च ।
पूर्वाद्रिशृङ्गे पथिकाङ्गनानां
हर्तुं मनः प्रज्वलतेव भीष्मम् ॥४८॥

In Public domain. Digitization Muthulakshmi Research Academy

अथ पुङ्खानुपुङ्खसमागतमदनकुन्दविशिखेभ्यः चन्द्रकिरणेभ्यः समुज्वलितेभ्य इव जनितचन्द्रिकापूरेण परितप्यमानावयवः तत्कालस्य कुसुमाकरत्वात् आत्मनः शृङ्गारवननिवसित्वात् विकसितनवमल्लिकाकुसुममञ्जरीपरिमलमिलत्पवनशिशुविसरापहृतधैर्यः शय्यायां लुठन् मुहुर्मुहुर्विकिरन् बाष्पकणान्नखाग्रैः कुसुमशेखरमुक्तवान् गद्गदस्वनेन नरपतिः ।

अहो पिकानां रवाः श्रूयन्तेऽशनिपाता इव मे श्रवणविवरयोः। गुरुनितम्बिनीहरोऽयं दुर्मार्गः चन्द्रः तनुं दहति मे चन्द्रिकया । प्राणोत्सर्जनोद्युक्तस्य कृते अस्य जनस्य किमर्थं शिशिरोपचारान् करिष्यसि। दैवहतकस्यैवमुद्यमे स्थिते इति वदतः क्षितिपतेः मधुरालापकलापैः पुनः पुनः शिशिरोपचारैस्सन्तापमपनयन् इतस्ततो दत्तदृष्टिः कुसुमशेखरः पटगृहद्वारतलघटितमणितोरणान्तरालस्थितमालोक्य शुकम् अवनीतलेन्द्रः विलोक्य कीरमिमं मञ्जरीप्रेषितमिव स्थितं इत्युक्तवति कुसुमशेखरे सविकिरः प्रभोश्शय्यातलमगात् ।

((..सन्मार्गगोऽप्यसन्मार्गगः.. कुवलयमोदकरोऽप्यखिलचक्रसन्तापकरः अमृतमयोऽपि मारकप्रियः द्विजराजोऽपि ..... सर्वज्ञशेखरोऽपि वियोगिजनता घनतापकृत् ।..))

ज्ञात्वा दृष्ट्वा क्षितितलपतिर्मञ्जरीरक्षितं तं
बाह्वोर्मध्ये शिरसि करयोः पत्रिणस्सन्निवेशम् ।
कुर्वन् स्थित्वा क्षणमथ मुदा बाष्पवाःपूरिताक्षः
स्वाङ्के दत्वा पदमिति शुकं तस्म मन्दं बभाषे ।।४९।।

In Public Domain. Digitization Muthulakshmi Research Academy

खल्वस्ति नालीकदलायताक्ष्याः
तस्याः प्रसादश्शुकसार्वभौम ।
अस्मिन् जने मुञ्चत अस्त्रजालं
भीते मदान्धात् कुसुमायुधाच्च ॥५०॥

विकसितजलजाक्ष्या नः पदं प्राप्तुमुक्तं
त्वयि किमिति सखीभिस्सिद्ध इत्थं वदन्तम् ।
जनपतिकुलचन्द्रं मञ्जरीसक्तचित्तं
मुखविजितपलाशः कीरशाबस्स चाह ॥५१॥

जय विपुलानाथरत्नमकुटविपुलाग्ररत्नकिरणगणधगद्धगितपाद-कञ्जात जातरूपनगधीरभीरहिताहितगर्वपर्वतवज्रव्रज्राञ्चितपाणिपद्म-पदमामलकटाक्षवीक्षणभाजन जननायक, तिलकतिलकाञ्चितभाल-भालयलयविलसद्वल्लकीगानरसामोदसामोदकमललसदानन सदा नवरत्नखचितगृहाङ्गणविहार हारावलीविराजमानदोरन्तराल करालवक्त्र त्यज धीरविगर्हितं त्वन्मुखावनीपतीनामयुक्तं दैन्यम् राजन्यललाम, ललानायाः शृणु महत्कष्टमिति चक्रे ससम्भ्रमारम्भम् ।

युष्मत्समीपादचिरं वराङ्गी
निवर्तितात्कष्टगुणाच्च सख्या ।
मुहुर्मुहुः मुक्तसितास्त्रपङ्के
र्भीता गृहं प्राप कथं सुमेषोः ॥५२॥

In Public domain. Digitization Muthulakshmi Research Academy

तत इतस्ततो दत्तदृष्टिः सिततररतिपतिविमुक्तवितत चूतशर झर्झरित-सकलावयवा अनवरतमाविर्भवन्निश्वासश्वसनविसरापहृतरदन वसन-शोभागलत्स्वेदजलकणकर्दमितसिताभ्रचन्दनमृगमदसङ्कुमुदपङ्काङ्किता कथमपि विविधकुसुममरन्दलुब्धमत्तमधुकररवविलसच्छय्योज्वलम्। मेरुगिरिमिव सुरालयं कैलासमिव चरच्छितिकण्ठं गगनमिव हंसभासुरं मदनकेतनमिव राजीवलाञ्छितम् अधिगम्य स्वकेलीमन्दिरम् उत्सृज्य शय्यातलं मामेति सखीभिर्निवारितापि कठतले चिरं मञ्जरी पपात ।

ततः शून्यीकृतेन्द्रियामालोक्य तामालीकदम्बस्ससम्भ्रमं अन्योन्य-मनङ्गकुन्तले विलोकय सखीं भ्रमरकुन्तले सिञ्चाङ्गानि, अनङ्गज्वलन-ज्वालाकीलाकलाप दन्दह्यमानानि चन्द्रचन्दनरसधारापूरेण, शृङ्गार-तिलके, पातय पयोधरतलयोः स्रवदमृतबिन्दूनि नवसारसाणि सकेसराणि । विलासिनि, शैवलैर्विलीनय दोर्युगलम् अब्जसखे, संवीजय कदलीदलैः। कन्दर्पसिन्धुरे, बन्धय मुखरितकादम्बकदम्बकम् अधर-जितबन्धूके, सन्तर्जयानुयातं रणन्नीलकण्ठम् उल्लसत्कम्बुकण्ठे, कलकण्ठकिशोरान् संस्थापय नवसहकारशाखासु सितनखे कुर्वन्त-माहारयाचनं कीरकिशोरम् अतिदूरं गमयित्वा दद बिम्बिकाफलम् इत्युक्त्वा काचिदभ्रवेणी मुक्ताचूर्णेन, काचिदब्जमुखी नीहारपूरेण, काचिल्लताङ्गी कुसुमचयेन, काचित् कर्पूरगन्धिः कर्पूरेण, काचिद्रम्भोरुः कदलीदलैः, काचिदचलपयोधरा चन्दनरसेन कृत्वा शिशिरोपचारान् मुहुर्मुहुः व्यर्थमनोरथास्सख्यः चकितमानसाः सत्यः चतुरवाणी नाम

In Public domain. Digitization Muthulakshmi Research Academy

मञ्जर्याः सखी स्वजीवात्पेमाकरा, काचिदबला तदा मामाहूय वामकरपल्लवे निधाय सव्यकरकमलेन मदवयवस्पर्शनं कृत्वा दत्वा मधुरफलाहारम् अतिमधुरालापकलापेन शुककलाप, तव मञ्जरी-प्रेमास्पदत्वात् इदं कार्यम् इतरदुर्लभम् अतिपुण्यतरं तरसा कुरु सारस शरभटवररतितामरसास्त्रयोः प्रणयकलहकुपितयोरन्तःकलङ्क-मपहाय सन्धानचतुर चतुरब्धिवलयितवसुमतीतिलकस्य कृत्वा मञ्जरीपाणिग्रहणं अमलयशस्सम्पादयेत्युक्त्वा लिखित्वा ते पत्रिकाम् इयं दातव्येत्यचिरमेव दत्तां पत्रिकाम् आलोकयेत्यदात् ।

तां पत्रिकां सव्यकरेण छित्वा
सन्तोषबाष्पाम्बुकणावृताक्षः ।
लेखामशक्तः क्षितिराददात्किं
वक्तुं भटायापि करालवक्त्रः ।।५३।।

कुसुमशेखरः पत्रिकामादाय सविनयमित्यपठत् ।।

महाराजराज राजश्रीराजच्छ्रीसमञ्चितसञ्चिताखिलरिपुनृपतिलक्ष्मी वेणीविरचितकुसुममालाधुमुधुमितकरकमलभासुरसुरविनुतसङ्गरोन्मुखकुमार सुकुमारमारसितशरपरम्पराविकम्पितमानसां राजशेखरे त्वयि समासक्त-मानसां मदालीम् अलकजितमादालीं मञ्जरीं कुचलिकुचतिरस्कृतमञ्जरीं तव कटाक्षवीक्षणामृतधारापूरेण परिषिच्य परिपन्थिमुकुटखचितकमल-रागकिरणगणलसच्चरणकमले करकिसलयरुच्याढ्याः कृत्वा अत्यन्त-शोभिनि तव मदनहतकात्त्रायस्व त्वयावलम्बितं भवतु रंहस्समर्था

In Public domain. Digitization Muthulakshmi Research Academy

नाहं द्रष्टुमस्याः कष्टं प्राणिदुर्लभम् अश्रुतमवीक्षितं न विरहोष्म वक्तुं अर्हाशोऽपि समर्थः। प्रलयकालोदितद्वादशसहस्रकरकरनिकरजनित-तापानलाच्चतुर्दशभुवनदहनलम्पटनिटलाक्षनिटिलानलविनिर्गतज्वल-त्कीलाकलापादधिकमिति निश्चितं मया नायमवसरो लिखितुं ग्रन्थविस्तरस्य ।

कृत्वा वार्तां त्वयि यदि शुकान्मञ्जरीरक्षणेऽस्मात्
मन्दं प्राप्ते क्षणमपि मया ब्रह्मकल्पान्तकल्पम् ।
नीतं कार्यं लिखितुमधुना भावि किं चास्ति वार्तां
जानासि त्वं नरपतिविधो मानसे स्थापितव्या ।।५४।।

तच्छ्रुत्वा राजा अमृतलहर्यां मग्न इव महानन्दजलनिधौ विलीन इव सन्तुष्टमानसः शुकमतिमधुरालापैः बहूकृत्य पुनः पुनः कुसुमशेखरमालोक्य खल्वमुना शुकेन रक्षितोऽस्मीत्युक्तवति राजनि महाराज, निरङ्कुशप्रतापजाड्यमयुक्तम् इदानीमेव मञ्जरीरक्षणतत्परो भव पश्चिमाचलशिखरे अधिवसति सकलचकोरमिथुनचञ्चुपुटपटलैः किरणगणादापीतलावण्य इव विगतकान्तिश्चन्द्रः तत्पूर्वगिरिशिखर-मलङ्करिष्यति भगवान् सहस्रकरः त्वं तथैव निर्वर्तितकालोचितव्यापारः शीघ्रमागन्तव्यम् भवता यत्र दृष्टमङ्गनारत्नं तत्प्रदेशमित्युक्त्वाज्ञामादाय ययावचिरमण्डजः ।

अथ सकललोकामोददानचतुरेण काललोहकारकेण निर्मितात् उदयधरादर्कचूर्णगन्धलोहमुर्मुरादिवस्तुसम्भरितगर्भमहावेणुनालादुद्धूत-लसत् घुटिकेव अपरजलनिधौ पपात क्षपानायकः।

In Public domain. Digitization Muthulakshmi Research Academy

अश्रान्तसुरतक्लान्तकान्तयुवतिकुचलिकुचो कन्दुकोपरिभाग-सम्पतद्युवजननिवहान् मुहुर्मुहुः प्रोक्षिप्तपक्षपुटास्सन्तः कुक्कुटास्सन्त-र्जयन्त इव ऊर्ध्वप्रसारित कण्ठनालाश्चक्रुः समुन्नतध्वनिम् ।

प्रियवियोगखिन्नचकोराङ्गनानां कष्टमसहमानेन परित्यक्तामोदा-लिकुलकलापा खेदमाप विगतविलासा कुमुदिनी ।

नवकमलरागखचिताङ्गदविराजमान प्रियदोर्दण्डतलनिहित कपोल-मुकुलास्समाचरितोपरतिश्रमसमाविर्भवद्धुमुघुमायमाननिश्वासपवमानचलद धरकिसलयाः चन्द्रचन्दनरसविलेपनोज्ज्वलप्रियवक्षस्थलन्यस्तहस्तपद्माः सौधाग्रतलेषु अखिलकुसुमकेसरपरागहारिणि योषितः कुन्दमुकुल-सान्द्रशय्यातलान्यधिगताः वीजयति मन्दवातकदम्बे मृदुकरकमलैः मन्दं आस्फाल्यास्फाल्य चलत्पोतकान् शनैः शनैः गमनोद्युक्तासु शयनागारेभ्यः कान्तासु रणदण्डजातजालेषु भूजालेषु उदजरवमिलत्पशु-खुरपुटसंघट्टनजनितध्वनिषु वीथीषु वारवनिताकुचकुम्भविलिप्त चन्द्रचन्दनपङ्काङ्कितदोरन्तरालेषु खरनिखरशिखरनिकरचिह्नितगण्डपालीषु जपाकुसुमारुणनयनेषु इतस्ततो दत्तदृष्टिषु शनैः शनैः पल्लवेषु निजनिकेतनान्यगतेषु मुखरितमधुकरमालासु कमलिनीषु वद्धव्रतेषु द्विजव्रातेषु परमहंसोऽपि रागकृत् सेवितानेकचक्रोऽपि एकचक्राधिष्ठितः जगद्बन्धुरपि चण्डकरः कमलामनोहरोऽपि रक्ताङ्गः तमो भञ्जयन् उदयशिखरमाससाद भगवान् किंशुककलापकान्तिः सहस्रकरः ।

In Public domain. Digitization Muthulakshmi Research Academy

ततः शय्यातलादुत्थाय भूनायकः कायजसितकदम्बकदम्ब-जर्झरितहृदम्बुजातः जातरूपमयपटगृहान्निर्गत्य निर्वाप्य कालोचितम् अशेषव्यापारं अपारमोहकूपारनिमग्नः करमवलम्ब्य गमनोन्मुखः कुसुमशेखरस्यासीदुद्यानवनं केलीभवनं मञ्जर्याः कुसुमशरकर-धृतसुममञ्जर्याः ॥

पुष्पासवासक्तमिलिन्दबृन्द
झङ्कारसंशोभितमार्गमध्ये ।
सन्दर्शयन् कीरमरालजालान्
उद्यानभूमिं स निनाय राजम् (राजानम्) ॥५५॥

आज्ञा यदाभूदवनीपतेस्तां
तथैव कीरस्सहसाधिगम्य ।
वसन्तसद्मक्षितिपालवार्तां
उदीर्य सन्तोषवतीं चकार ॥५६॥

ततश्चतुरवाणीविलासेन चतुरवाणीविकिरकलापमुखजित-किंशुकसुमकदम्बसितशरानलतापसंमूर्छितेयं अहो रक्षिता त्वया राजवार्तामृतधाराप्रसारेण महिमानं न हि तव अहिपतिरपि शक्तो वक्तुमित्युक्त्वा मञ्जरीं कथमपि निर्वर्तितसमयोद्योगां मामालीभिस्सह केलीवनप्रयाणोन्मुखीं चकार ।

त्रिचतसृभिः अबलाभिः प्राणकल्पाभिः उपेता शुकपोताञ्चित-कराम्भोजा भुजौ निदर्शनलालसमानसोऽपि शनैश्शनैर्दत्तपदकिसल-

In Public domain. Digitization Muthulakshmi Research Academy

यविन्यासा वामां सञ्चितमण्डलीकृतजटाग्रा निटिलाग्रसञ्जात स्वेदकण-जातराजदानना गजदानगन्धगन्धिलेन अनिलप्रसारितान्दोलितशाखि-शाखाग्रगुलुच्चस्रवन्मधुरमधुबिन्दुना पत्रसंसक्तघुमुघुमितमार्गेणागत्यागत्य राजीवराजीवविराजद्विराजकलकलविरुताञ्चितमहीरुहमगमन्मञ्जरी मञ्जरी-कान्ताः प्रापुः केसरपरागसंसक्तालककान्ताश्च केलीवनं आतपजनित-स्वेदोदकान्ताः ।

वनमधिगम्य क्वचिन्नवमल्लिकावृताभिः क्वचिदेलालतावासिताभिः क्वचित् गलन्मधुबिन्दुबृन्दद्राक्षालताञ्चिताभिः क्वचित् ताम्बूलवल्लीदल-जातविराजद्भिः क्वचित् मुखरितमदमधुकरपटलाभिः क्वचित् रावणा वार्ताभिरिव रणच्छुकालापाभिः क्वचित् सुकविकविताभिरिव मत्तकोकिलाञ्चिताभिः क्वचिद्वारकान्ताभिरिव पल्लवकान्ताभिः शाखाभिरुपेतम् आयतनं शीतलानाम् निवासपदं शृङ्गाराणाम् पुष्पित-पूगीकाञ्चनाञ्चितपूर्वभागं कर्पूरपूरविकिरत्कदलीकाननावृतदक्षिणप्रदेशम् चन्दनतरुपटलपनसपुन्नागलसदपरदेशोत्तरदिशमाश्रित्य सहकारं कर्पूरसै-कतोपरि किसलयशय्यायां निषण्णा सखीभिरावृता अनङ्गसितासिधारेव भयमुत्पादयन्तीव पश्यज्जनानां इतस्ततो दत्तदृष्टिरासीत् वसन्तनन्दनी।

नरपतिरपि प्रविश्योद्यानमानमिताङ्गः लवङ्गीलतापिहितजम्बूकुञ्जेषु मार्गमध्ये क्वचित् मरन्दप्रवाहेषु शनैःशनैर्दत्तचरणविन्यासः क्वचित् गजदानकर्दमितभूप्रदेशेष्ववलम्बितकुसुमशेखरपीवरांसतलः कथम-प्यतिक्रमिताखिलमार्गः शृण्वन् सकलविकिरविरुतम् अनिलविकिर-

In Public domain. Digitization Muthulakshmi Research Academy

त्कुसुमकेसरपरागाञ्चितावयवः सन्दर्शनेन आलीभिस्ससं भ्रममुत्थाया-श्रयन्तीं चतुरवाणीचरमभागमिषात् आकुञ्चितमुखकमलां वासन्ती-मद्राक्षीत् ।

क्षणं पदकमलयोः क्षणं जङ्घातलयोः क्षणं ऊरुयुगले क्षणं कटिद्वये क्षणमुदरभागे मुहूर्तं कुचलिकुचयोः निहितात्मदृष्टिः तन्मुखलावण्यमिव पिपासुरिव वीक्षणपटलैः नयनयुगम् आननं अङ्गनायाश्चिरं निनाय भूनायकः।

राजन्नपाङ्गैः कलिकापुत्री च ददर्श वेपमानाङ्गी ।
चक्रीकृतबाणासनसुमबाणविमुक्तबाणलग्नाङ्गी ।।५७।।

ततश्चतुरवाण्यां महीपालमभिवाद्य सद्यस्समादाय सितदलपीठमुन्नतं निधाय कुसुमितकाञ्चनप्रदेशे प्रभुशिखामणे तिष्ठेत्युदीर्य पीठमधिष्ठि-तस्य राज्ञः पुरस्सभयं ससम्भ्रमम् अवलम्ब्य चामरं वीजयन्त्यां मञ्जरीविरहमशेषमुदीरयन्त्यां निष्ठ्यूतबाष्पकरुणारुणनयनयुगला अत्यन्तवेपमानशरीरा चञ्चुपुटेनादाय नाथस्य पत्रमेकम् आकर्षणं कुर्वती सरयमागत्य कलहंसी काचित्कलिकासुतासमीपम् आः कष्टमापतितं मे पुण्यायाः दुरात्मना अमुना नाथहतकेन मे वज्रकठिनहृदयत्वात् अस्मिन् दुर्भरेऽपि कष्टे प्राप्ते सप्राणास्मि तदसङ्गतस्य अवलोक-नस्यानन्तरन्तु प्राणैः किमिति विचार्य शरीरत्यागाय सम्पद्ये धनादिकं ममाबाल्यादात्मजीवादनुरागास्पदं कुर्वन्त्यै देव्यै समुदीर्य अखिलवृत्तान्तम् अथ मनोरथसिद्धिं करिष्यामीति निश्चित्य अस्पर्शयोग्यमप्यस्य दुर्वर्तनस्य

Digitized by Siddhanta eGangotri Gyaan Kosha Digitization Muthulakshmi Research Academy

पक्षमेष पापात्मा युक्तायुक्तविवेकहीनः देवीदर्शनविमुखो भविष्यतीति धियावलम्ब्य आगतास्मि मे तुण्डस्य पावकदग्धस्यापि नहि शुचि-र्भवतीति मन्ये निशि देव्यास्समीपमाश्रित्य सखीजनेषु शुकपि-कादिविकिरजातेषु कुसुमेषु सितसायक्लान्तां त्वामालोक्य भीतभीतमानसेषु मे प्राणनाथः कुत्रास्ते न देवीदर्शनार्थमागतः किमर्थमभूत् न कष्टं जानाति देव्याः किं किं करोमीति व्याकुलमानसामालोक्य कलहाशन्यभिख्यायां कस्याश्चित् शारिकायां किमर्थं खिन्नासि मासद्वयमारभ्य ते भर्ता भर्त्रा परित्यक्तां स्वैरिणीं नाम मयूरा मिथस्समाश्रित्य सुरतप्रार्थनां कुर्वन् स्वैरिणीकटाक्षवीक्षण तत्परोऽभूदिति प्रसङ्गवशात् मम सख्या विदितवृत्तान्तास्मि दिवसेऽस्मिन्नितः प्राणमानरक्षके न समाचरिते पतिनैवंविध (पत्यैवंविध) दुराचारे का किं करोति परतरुणीसुरतरतपतिकण्ठाश्लेषाद्वरं मरणमिति उक्तवत्यां क्षणमवाप्य निश्चेष्टिताम् अथ कलहाशनी लब्धसंज्ञा किं किं वद बताहो दुर्वार्तेयमम्ब कथा रेव(द्वे?) श्रवणविवरे मे आयासयिष्यति सत्यमेतत्खलु न खलु नवालीदुर्गुणालीपदमिति मया उच्चार्यमाणा शारिका पतावधिका प्रीतिस्ते अतः न वाक्यं मे विश्वासयसि तवासत्यश्रवणं कृत्वा किं सुकृतं सम्पादयिष्यामीत्युक्त्वा मे रहस्यपदं निवेदयामास।

श्रुत्वा तद्वार्तामखिलां एकतः तीव्राशनिसहस्रपातभग्नावयवेव पीवरांसद्वयनिषाददोर्दण्डनिभृतमुसलप्रहारझर्झरितमस्तकोरगीव चिरं शून्यीकृतमानसा कथमपि कलहाशनीहितोपदेशात् अवाप्येन्द्रियव्यापारं

In Public domain. Digitization Muthulakshmi Research Academy

अथ तथैव प्राणपरित्यागोद्युक्ताहं मुहूर्तं विचार्य रहस्यस्थलविलोकने दत्तबुद्धिः अतिकष्टेन क्रोशयुगं गत्वा नवमल्लिकापरिवृतजम्बूकुञ्जमवाप्य शारिकाकथितं इदं खल्विति निश्चित्य तत्र अधिगम्य नीत्वा प्रहरद्वयं निश्शब्दमिदानीमेव भगवान् कमलबान्धवः पूर्वगिरिशिखरमलङ्करिष्यति मे नाथस्य न सङ्केतपदं इदं भवति किमिति डोलायमानमानसाहं प्रविश्य जम्बूकुञ्जान्तरालमायान्तमिममालोक्य दुरात्मानम् आक्रोशन्ती दैवहतक कियद्दुःखं दत्तोऽसि मदनहतक कियत्कार्यं सङ्घटकोऽसि इति चिरं विलाप्य ततः पर्णमादाय देवीचरणसन्निधौ पातितास्मि इयमिदानीमेव गात्रोत्सर्जनं करिष्यति इति विलपन्तीमाहूय कलहंसी सानुकम्पं समाश्वास्य शरीरमास्फाल्य कोपमहो त्यजेति वदन्त्याः प्रणम्य मञ्जर्याः पादयुगलं बाष्पकणान् उत्सृजन् कलहंसः दीनरवेण देवि मे सप्रसादं वाक्यं शृणु कस्मिन् दिने अस्यामविद्यमानायां निकेतने क्षुत्पिपासाकुलं रुदन्तमादाय शिशुं एतद्विलोकनार्थमधिगम्य कियद्दूरमालोक्य कलहंसिनीं मम प्राणेश्वरीं मम प्राणेश्वरी कुत्र वर्तते त्वया न ज्ञातं हीति मया पृच्छ्यमाना क्षणमवाप्य जोषं अथ शिरः-कम्पं कृत्वा खिन्नवदना तद्वार्तां मां किं पृच्छसि ते अग्रभागे साम्प्रतम् अनृतकथनं अवलम्बिते मया यथार्थे तदुपरि किं भविष्यति ते दारा अनङ्गनाम्नश्शुकस्य कृते तत्पदं जम्बूकुञ्जं अष्टाविंशतिदिवसानारभ्य क्वचिन्मिथः सम्प्राप्य अनङ्गेन अनङ्गक्रीडारताभवदिति नदीतटे श्रुत्वा तदा धिक् धिक् स्त्रीजातमहो तथाविधमनोहरं परिहृत्य अनङ्गेन किंभोगमनुभविष्यति मुग्धत्वादस्याः प्राणनायकस्य इच्छाविहार-स्सम्भवति ।

CC-0. In Public domain. Digitization Muthulakshmi Research Academy

इति निश्चित्य तदारभ्य तुभ्यमिमां वार्तां वक्ष्यामीति वचनोत्सर्जनोद्युक्तां मे किं प्रयोजनमयुक्तकथनमिति अस्तङ्गमितापवादास्मि इदानीमत्र किमभवद्वा। उत कुत्रास्ते न निर्णीतं मयेति ततोदीर्य स्वभवनमधिगम्य ह्यवलोक्य भगवत्यस्तं गते सवितरि गृहमायान्तं मामप्यपृच्छ्यमाना मया कलहाशनी मिथस्ते दाराणां अनङ्गस्य गोष्ठ्यामुक्तं मुहूर्तद्वयोपरि शृणु वाक्यमनङ्गस्तवालोक्य प्राणेश्वरीं किमर्थं मिथ्यावादिनि कलहंसिनि मां सन्तापयसि अहमेकाकी इतस्ततो दत्तदृष्टिः सङ्केतपदे निशायां ते दर्शनार्थी निशान्तं द्रष्टास्मीति वदन्तम् अनङ्गं नमस्कृत्य मे अपराधं रक्ष भर्तुर्निशि निद्रारहितत्वात् तवापतितं कष्टम् इमं त्यज कोपमिमं दशघटिकावधौ अरुणोदये स्थिते गमिष्यसीति उच्चार्य तस्मान्निर्गताभूत् तत्त्वयाश्रितव्यो जम्बूकुञ्जोऽस्यान्निशीत्युक्त्वा कलहाशिन्यां स्वपदं गच्छन्त्यां तत्र मुहूर्तं विचार्य डोलायमानमानसोपयुक्तः तथैव जम्बूकुञ्जमवाप्य विगतनिद्रस्सर्वतो दत्तदृष्टिः निशान्तं गमयित्वा कलहाशिनि कलहाशिनि इति निश्चित्य आयातस्य मे मूर्धानं दष्ट्वा तीव्रचञ्चुना विदार्याखिलशरीरं चरणनखैः किं दुश्चेष्टावलम्बिता त्वया अहो प्राणेश्वरि केन हेतुना कुप्यसि किमर्थं मां वञ्चयसि इत्यनुनीतापि किमपि नोक्त्वा तदैव आदाय पत्रमध्वनि तत्र तत्र रुषा कण्ठकशाखासु पातयन्ती चरणप्रहारैस्ताडयन्ती निनाय देवी समीपमार्यहलमित्युक्त्वा रुरोद ।

ततस्तमपि समाश्वास्य सखीं मञ्जरिकाञ्चाद्राक्षीत् ।

In Public domain. Digitization Muthulakshmi Research Academy

तदा तदालोकनविदितवासन्त्यभिप्राया भूनायकोपकण्ठम् आली-कलहंसमिथुनं निधाय प्रणम्य चरणयुगलं करालवक्त्रस्य ललना-कुसुमशरासनयोः ज्ञातं खलु वैरमिदमाक्षिप्य भवता सङ्घटितव्यं सख्यमिति उदीर्य मञ्जरीसमीपमगमत् ।

नरपतिमालोक्य कलहंसमिथुनकलहनिवारणरतमस्तोभमनयो र्वैरमित्युक्त्वा अनुभवितमधुरफलमेनं कृत्वाङ्गनामनङ्गसायकोपगत-साध्वसाम् अञ्जसा कुरु ददाज्ञामिति उक्तवत्यां चतुरवाण्यां कुसुमशेखरस्तामब्रवीत् ।

चतुरवाणि महाशनिकेतनं
पटमयं मणिकल्पितमायतम् ।
त्वमधिगम्य वसन्तसुतापते
स्वपदमर्हसि गन्तुमथाज्ञया ॥५८॥

कुसुमशेखरस्य किञ्चिद्विहस्य वचनानन्तरं चतुरवाणी सशिरःकम्पमो-मित्युक्त्वाग्रे महीपालः तदनन्तरं कुसुमशेखरः पश्चाच्चतुरवाणी ततः कलिकासुता अथ वयस्याः पन्थानमधिगम्य अतिक्रम्य कियद्दूरं अनोकहनिवहान्तराले अग्रभागस्थितशातकुम्भकुम्भखचितद्युमणि-मणिकिरणगणालङ्कृतगगनम् अमलमुक्ताफलजालकल्पितकोटिभागम् आखण्डलोपलोत्कररचितवेदिकोपरितलनिहितविद्रुमस्तम्भमरीचि-मालालालितसभाप्रदेशम् इन्द्रगोपपटलारुणपटाञ्चितोपरितलम् अगरु-धूपधूमरेखानिकरधुमुधुमायमानम् आयतवितानपटान्तरालविरचित-कलितुरङ्गमविहङ्गमाद्यनेकविलासभासुरम् अब्जरागखचितकनक-

CC-0. In Public Domain. Digitization Muthulakshmi Research Academy

पीठघृणिप्रसारारुणितो भयपार्श्वनिहितकुमुदहितकान्तिनिर्मित-पाञ्चालिकाकरनिभृततालवृन्ताग्रभागकल्पितानल्पकुसुममधुपानरतागत-मधुकरनिकरमुखरितसभान्तरालम् असिगदाबाणबाणासनसितकुन्तला-द्यनेकायुधसमुदयेन स्फुरदुरुमाणिक्यकीलितलालितखट्वाभ्याशस्थितरत्न-पुत्रिकाकरधृतसिताभ्रकरण्डसमृगीमदचन्दनरसपूरितचषकविनिर्गता-मोदेनोल्लाभपटलकोटिघटितनवरत्नमालारुक्पूरेण भासमानशय्यागृहोपेतं समुदं ददृशुः प्रभुनिकेतनं कान्ताः ।

वसन्तपुत्रीं समुदीरयन्त्यो मृदूनि वाक्यानि रसोज्वलानि ।
तद्गेहचित्राणि विलोकयन्त्यः चक्रुर्निवासं चिरमत्र कान्ताः।।५९।।

अथ मधुपानमदमत्तमत्तकाशिनीनेत्रद्युतिः भगवान् तिग्मदीधितिः पपात पयोनिधौ।

सकलविरहिणीविजयोत्सुकस्य कृते कुसुमायुधस्य दिगङ्गनाकर-किसलयधृतकमलरागरचितारुणकुसुमपूरितपात्रजातराग इव रराज सन्ध्यारागः ।

तिमिरमनङ्गकरमुक्तेन्दीवरनिकरकिरणपटलमिव रेजे ।

श्यामासमागमासक्तस्य कृते कुवलयनाथस्य अम्बरशय्यायां इन्द्रनीलविनीलायामवस (वेलाविलासिनी) रचेटीरचितकुन्दमुकुलानि रेजुरिव नक्षत्राणि।

नरपतिहृदयमिव कुमुदवनं विकासमभजत् ।

In Public domain. Digitization Muthulakshmi Research Academy

नदीतटेषु महीसुरवरसमाश्रितेषु कौशिकेषु जीर्णतरुकोटर कुटीरविवरविनिर्गतेषु कामुकीषु समण्डनासु प्रियसमागमतत्परासु हर्म्येषु अगरुधूपधूमवासितेषु षिद्गेषु पतन्तीषु स्वैरिणीकुचकुम्भेषु दुन्दुभि-ध्वानघूर्णितेषु राजभवनेषु राजा राजानमभिरञ्जयन्निव संवर्धयन् रागं उदयगिरिशिखरमलञ्चकार।

ततश्चतुरवाणी मञ्जरीमलङ्कृत्य नरपतिवामाङ्कस्योपकण्ठं आर्यहलं निषण्णं कृत्वा कुसुमशय्यायां भवता कलिकासुता पाल्यतामिति राजानमुदीर्य तेनाज्ञामादाय सखीभिस्सह स्वपदमगमत् ।

यदा महीपालवराङ्कयोगः सक्थेरभूत् भिल्लपकन्यकायाः ।
रोमाञ्चजातश्च तदाखिलाङ्गेऽभवच्च नीवीवलमानबन्धा ।।६०।।

यदाम्बुजाक्ष्याः कुचकोकयुग्मे हस्तप्रसारो जननाथमौलेः ।
अभूत् तदा झर्झरिताम्बरं तत् कुचद्वयं चन्दनसान्द्रमासीत् ।।६१।।

नरपतिकुलचन्द्रः कामिनीं बाहुयुग्मात्
प्रणयवचनमुक्त्वा सम्यगाक्षिप्य सक्थिम् ।
चिरसुखमनुभूय प्रापयित्वा कपोले
नयनयुगललाटं दन्तवक्त्रे चुचुम्ब ।।६२।।

नितम्बनाभिस्फुरदूरुहस्त
संस्पृश्य कञ्जातदलायताक्ष्याः ।
अवाच्यमानन्दमयं नितान्तं
अगात् सुखं राट् रतिजं सुदीर्घम् ।।६३।।

Digitization Muthulakshmi Research Academy

पाञ्चालिकावीजितताल वृन्तात् समुद्भवैर्वायुभिरङ्गलग्नैः ।
रत्युद्भवस्वेदमपानयद्भिः प्रहृष्टचेता जननायकोऽभूत् ।।६४।।

वसन्तपुत्र्या अथ कुन्तलानि निकर्षयन् चन्दनचन्द्रपङ्कम् ।
नखैस्समादाय लिलेप नाथः कुचप्रदेशे स्मितभासुरास्यः।।६५।।

चषकमथ लताङ्ग्यै पूरितं चन्दनेन
खचितविमलरत्नं भूपतिर्हेमदीप्तम् ।
विरचितसकलाङ्गो गन्धसारेण दत्वा
कुसुममृदुलगात्र्या प्रार्थितः पूर्वमासीत् ।।६६।।

ततः पाञ्चालिकाकरधृतकनकपात्रस्थितमादाय ताम्बूलमनुभूय तया साकं मुहुर्मुहुः चुम्बितवासन्त्याधरमधुरसुधारसधारः चूचुके निपीडयन् नखशिखरैः विरचयन् वेण्यामलिपटलमरीचिभासुरायां अनल्पानि कुसुमानि दष्ट्वा कपोलौ मुकुरविमलौ कुसुमशरकेलीसुखमनुभवन्निव निशां निमिषमगमयत् ।

ततश्चोत्थाय निर्वर्तितसमयव्यापारः परिहृत्य राज्यलक्ष्मीमत्रैव कृत्वा निवासं मञ्जरीनिगूहनतत्परः क्षणमिव दिवसान् गमयन् कदाचित् अवलम्ब्य करमङ्गनायास्समुदं निकेतनान्निरगात् ।

निर्गत्य च क्वचित् विलोकयन् कुरङ्गमिथुनानि क्वचिदण्डजातानि क्वचित् मरन्दलहरीः क्वचित्सरांसि नवहंसमिथुनानि च सन्दर्शयन् वसन्तजायाः सुदूरमतिक्रम्य अरुणनयनदृक्प्रसारेण जगदखिलमिव

In Public domain. Digitization Muthulakshmi Research Academy

मषीकर्तुमुद्वीक्षयन्तम् अतिदीर्घसितदशनभीषणाननकुहरं धृतसित-मण्डलाग्रशरशरासनाद्यायुधं गदाकुन्तलधारिभिश्चतुर्भिरसुरैः मदमत्तै-राश्रितसव्यसव्येतरप्रदेशम् उद्गिरता खलीनकण्टकनिष्पीड्यमानाभ्यां तालुभ्यामीषद्व्रणाङ्किताभ्यां डिण्डीरपूरमूर्ध्वप्रसारितमस्तकेन मुहुर्मुहुः पाटयता कीलितायश्शकलैः खुरैः कठिनतरैरवनीतलं कशाताडन-दन्तुरितसव्योरुणा किंशुकारुणनयनयुगलेनाश्वेन संवाह्यमानं पुण्य-जनमपि सुरादरम् खट्वारूढमपि धावयन्तम् देवानांप्रियम् असुरं कञ्चित् अद्राक्षीत् ।

विलोक्य प्रिये कृतान्तमिवायान्तम् आलोकय लोककण्ठकम् इमं शमननगरं प्रापयामीत्युक्तवति क्षितिभृति निकषमधिगम्य महीशितुः को रे भवान् किमर्थम् आगतोऽसि धीर इव साबलोऽसि पुण्यभेदिनः पुत्र एष योगिभिदाख्यः ते जीवमाहरन्ति रदनाः त्वरन्तेऽस्य कण्ठखण्डने रसना मुहुर्मुहुश्चलति रुधिरपानाय, नयनोत्पाटनं नखाः काम्यन्ति भृशमङ्गपीडने त्वरते करयुगलम् धावति मनः शिरश्छेदाय इत्युदीर्य समादाय शरासनम् आशुगं आशु सन्धास्य कन्धरं चिक्षेप महीपतेः ।

नरपतिरपि सितशरम् असुरवरं दोरन्तरालं मण्डलीकृत-शरासनान्मुमोच ।

निशाचरश्च इषून् सप्त वक्षसि अवनीनायकस्य उत्ससर्ज ।

In Public domain. Digitization Muthulakshmi Research Academy

सङ्गरोन्मुखसुतः सङ्गरोन्मुखः त्रयोदश निशाटं शिलीमुखान् स्फुरत्स्फुलिङ्गोज्वलोन्मुखान् मुमोच ।

पलाशः पुष्पितपलाशमिव राजानं मार्गणगणेन कृतवान् ।

करालवक्त्रः कङ्कपत्रेण निशितेन पत्रं निशाटस्य चिच्छेद ।

पूर्वदेवं पत्रमपगतप्राणमालोक्य भुजङ्ग इव दण्डहतमध्यभागः सक्रोधस्सितनाराचेन मस्तकमवनीशस्य जघान ।

मानवेशोऽपि पुनस्समादाय कार्मुकम् असुरं इषुत्रयेण मूर्च्छां निनाय ।

ततः किङ्कराः किमर्थं नो जीवितमित्युदीर्य निष्ठ्यूतरुधिरं अञ्जसा उरश्चक्रुः करालवक्त्रस्य ।

मण्डलाग्रेण मण्डलाग्रचतुरः चतुरः किङ्करानाच्छिनत् । योगिभिर्द्विगतमूर्च्छः कथमप्यवलम्ब्य धैर्यम् अवनीतललम्बमानानालोक्य पिशाचखरनखरशिखराकर्षितवपान् ऊर्ध्वप्रसारितकण्ठनालानां विशालीकृतपर्णपुटानाम् अन्योन्यं कृतरवाणां कङ्कगृध्राणां चञ्चुभिर्दश्यमानान् ईदृगवस्थाभाजः किङ्कराः किं करोमीत्युदीरयन् सरयमागत्य गदया दोरन्तरालं करालवक्त्रस्य ताडितवान्।

तदा गदाप्रहारेण द्विगुणीकृतरुण्महीपालः सक्रोधोत्साहः शीर्षमसुरस्य मण्डलाग्रेण अच्छिनत् ।

In Public domain. Digitization Muthulakshmi Research Academy

अथ रुधिरवपामिषलुब्धकङ्कगृध्रकलकलरवाञ्चितम् उत्सृज्य कदनभुवं दशाधिकशतव्यामप्रमाणं गत्वा अध्वानं गलगलध्वानं कुर्वन्त्यां लहर्यां प्रक्षालितकरचरणमण्डलाग्रः समेत्य वासन्तीनिकटमयि मयि निशाकरास्ये निशाचरेण कुर्वत्यायोधनं वेपमानमानसासि किम् अस्य तव कृते हृदभजत व्याकुलतां न रिपुविदारणे प्रहरेऽस्मिन् असुरवैरिसुतशितशरासनोऽस्मि.. भीतो न सुरवैरिसुतशितशरा त्वत्कुचकुम्भवियोगात् भजति विचारमुरो मे नारीकुन्तलयोगात्। इत्यादीनि वचनानि उदीर्य गाढमालिलिङ्गाङ्गनां नरपुङ्गवः ।

मुहूर्तमालिङ्ग्य अनुभूयान्तिकस्थितरम्भामाकन्दफलानि स्रवद्रस-बिन्दूनि निजनिकेतं निर्जगाम ।

निर्गत्य चाघ्राय सुकुन्दगन्धानालोक्य कादम्बकदम्बयुग्मान् ।
उद्यद्विषाणं मृगमन्तिकस्थं गत्वा कियद्दूरमलोकयत्सः ।।६७।।

ततस्तद्ग्रहणेच्छया अनुसृत्य निश्शब्दमध्वानं तस्य नीत्वा शतव्याम-परिमितवर्त्म फलभारावनम्रकपित्थमाकन्दपनसमुखनिखिलमहीरुहम् अनेकपकिशोरकराकर्षणसुखितकेसरिणं हरिणार्भकतुण्डताडनगल-त्पयोधाराञ्चितपुण्डरीकयोषित्पयोधरपानसमयतालुयुगलगलत्फेनपु-राङ्कितभूतलम् उत्साहधावद्वराहडिम्भखरखुराग्रभुग्न भुजङ्गी समाश्रित-वल्मीकविवरं चलत्कर्णखादनलालसवानरशिशुसमधिष्ठित कुम्भस्थल-कुम्भिनम् आतपक्लान्तसमागतानां कुम्भीनसपोतानाम् आतपत्री-कृतस्वपर्णाञ्चितनीलकण्ठम् अवनीतलस्थिताननुदितपर्णपुटान्

In Public Domain. Digitization Muthulakshmi Research Academy

मुहुर्मुहुराक्रोशयतः शुकपोतानादाय ससुखमाननैश्शाखिशाखान्तराल-स्थितनीडेष्वारोप्य अवनीपतद्गन्धमार्जालमेकविंशतिदुःखध्वंसो मोक्ष इत्यात्मप्रमादाप्रार्थितशुकसमीरितमधुरवचनश्रवणासक्तकपोतव्रातम् अव्ययम् अद्वन्द्वम् अनन्तम् अखिलजगदाधारं जगत्सृष्टिस्थितिप्रलय-कारणं भजत महादेवमिति तरुणीभ्यः प्रदत्तवचनाञ्चितनीलकण्ठाश्रित तपोगृहमङ्कतलप्रसुप्तमृगशाबमास्फालयता करेण आकरेण महतां तपसां माणवकपठितोपनिषद्वाक्यानि शृण्वता अग्रभागस्थापितामलाम्भःपूरित-रत्नकमण्डलुना अरुणजटापटलप्रभाप्रभासनेन असमानेन तारका-मलस्फटिक मालावृतकण्ठेन कण्ठेकालचरणद्वयसमासक्तहृदा हृतान्त-श्शत्रुबृन्देन चन्द्रेणेव कुरङ्गाङ्केन हरिणेव सत्वगुणप्रधानेन ब्रह्मणेव विबुधगुरुणा कामारिणेव जितमन्मथेन महावटविटपिनेव लम्बमान-जटाकलापेन सेवितत्रिणेत्रेणापि न युगाञ्चितेन । हरदत्तनामाञ्चितेन केनचित् मुनिकुञ्जरेण देदीप्यमानमध्यभागम् आनन्दकरं पुण्यकाननम् अपश्यत्।

विलोक्य किमहो अस्याश्रमस्य प्रभावः, किमिदं चित्रम् अजामन्तिकस्थितां स्पृशति नेयं याघ्री क्षुधार्तापि। किमहो निजचरणलग्नं सरीसृपम् अवलोकयति न नीलकण्ठः। मूषिकेयं मुहुर्मुहुर्धावन्ती भुजङ्गीफणाग्रमधिवसति। वृक्षान् समालोक्य च गलन्मधुबिन्दून् मधुमक्षिकापटलान् भग्नन्ति नायं वराहव्यूहः पोत्रैः पालयति गोत्राम्। मदजलमलीमसकपोलयुगलाः कुम्भिनः करावलम्बितशाखा न शाखाः कदापि धुन्वन्तीति मञ्जरीमुदीर्य तदाश्रमलग्नदृष्टिः कतिपयपदानि

In Public domain. Digitization Muthulakshmi Research Academy

गत्वा मदालिलालितगुलुच्छाञ्चितस्य आवृतानेकलतस्य अधिवसन्तं शाखां चञ्चुना विदारयन्तम् बिम्बम् उद्यत्पक्षपुटमद्राक्षीच्छुकमवनीशः।

अवलोकय प्रिये शुकशाबकमिमं त्वदधरकल्पस्य रसंपिबन्तं बिम्बस्येत्युक्तवन्तम् अवनीकान्तं वासन्त्यब्रवीत् ।

प्राणेश्वर मदभीष्टसन्धायक शुके अस्मिन् मनः लगति.. भृशमिममादाय कथमपि मे दातव्यमित्युक्तवत्याम् मञ्जर्यां अयि रमणि विलोक्य चाश्रमस्य अद्भुतमस्य माहात्म्यं पुण्यकाननिवासिनं नाण्डजमिमं गहीष्यमीत्युक्तवतः पत्युश्चरणयुगले चिरं मञ्जरी पपात।

ततः का भविष्यति दैवेच्छेत्युदीर्य तद्गहणलालसमानसो भूत्वा दत्वा पदानि शनैः शनैः करेण शाखामवलम्ब्य शुकाधिष्ठितां बाहुमूर्ध्वं प्रससार सः।

यावन्महीपाले प्रसारयति करं तावत् ससाध्वसश्शुकस्साल-मन्यमन्तिकस्थितमगमत् ।

शुकस्याल्पपत्रतया ग्रहीष्यामि इत इति धिया तेन साकं शतत्रयव्याममध्वानम् अतिक्रम्य कष्ठकाग्रकीलितचरणयुगलः स्वेदकणाम्बुपूरसिक्तगात्रः शुको न मया गृहीत इति निश्चित्य च चलदुदरं पत्रमेकं निकर्षयन्तं चञ्चुना विकिरमालोक्य सैकतस्थितं गृहीतुमवनीशः स्पृहाञ्चकार।

महीपाले निकषमुपगतवति स्वस्य शुकः पुरा स्थितं पुरातन-पुरारिप्राकारमगमत् ।

 In Public Domain. Digitization Muthulakshmi Research Academy

स्थित्वा क्षणं तत्र करालवक्त्रात् भीतः शुकः प्राप महेश्वरस्य।
प्रासादशृङ्गं जनलोकनाथः समाश्रयत्सद्म च राजमौलेः ।।६८।।

आश्रित्य किमहो दुर्लभः शुकशाबः इममगृहीत्वा कथं प्रमदां द्रक्ष्यामि इदानीं भगवान् दिवसकरः प्रवेक्ष्यति घटिकामात्रेण अपरजलनिधौ अनेन सार्थं गत्वा महद्दीर्घमध्वानमपि अग्रहणमयुक्तम् अतः समारुह्य प्रासादशिखरं शनैश्शनैः करेण आकर्षणं करोमि इमं कष्टदम् अथवा मे शिलीमुखेन हनिष्यामीत्युदीर्य प्रावारप्रावृतमध्यभागः प्रासादस्य कृत्वा प्रदक्षिणं आरोहणार्थ मनुकूलमार्गमवलोकयन् शिखरदत्तदृष्टिः क्षणमुपविश्य मूले ध्वजस्तम्भस्य उत्थाय आरोहणा-सक्तमनाः कराभ्यां तत्र तत्र उपलानवलम्ब्य अधिगम्य पुरुषष्ट्प्रमाणं ईशानदिशि रचितबलीवर्दविषाणाग्रं धृत्वा करेण सव्येतरेण ईषत् प्रसारयति चरणमवनीशे शृङ्गाग्रं बिभिदे।

यावद्विषाणं शिलरूपमासीत् भग्नं भृशं कम्पितसर्वगात्रः ।
भूत्वा स हा शङ्कर शूलहस्तेत्युदीरयन् तावदधः पपात ।।६९।।

पाषाण संघट्टनभिन्नशीर्षः उद्गीर्णरक्ताङ्कितफालभागः ।
विच्छिन्नहारावलिशून्यकण्ठः प्राणान् मुमोचाशु करालवक्त्रः ।।७०।।

आदाय कालस्य च किङ्करौ तं क्रुद्धस्य रक्तारुणनेत्रयुग्मौ ।
मुहुर्मुहुर्वर्त्मनि ताडयन्तौ क्रोशद्वयं निन्यतुराशुभूपम् ।।७१।।

In Public domain. Digitization Muthulakshmi Research Academy

अथ मन्दारसुमबृन्दरचितमालिकामरीचिपुञ्जरञ्जितमुक्ताफलविराजत्कोटि-भागम् कनकशृङ्खलाघटितरत्नकिङ्किणीरणरणरवानुगुणमन्दारमरन्द-लुब्धमधुकरनिकरमधुरगीतारवभासुरम् शूलहस्ताभ्यां सितभस्मविलिप्त-पुराभ्यां प्रमदाभ्यां अधिष्ठितपुरोभागम् वल्लकीवादनिरताभिः निभृतचामरदण्डाभिः गन्धर्वतरुणीभिः समुज्वलम् उद्यद्रविबिम्बकल्पम् अनल्पमणिगणरचितमाराद्विमानमद्राक्षीज्जननायकः।

यावद्विमानं यमकिङ्करौ तौ आलोक्य साश्चर्यभयौ नृपालम् ।
आताडयन्तौ च तदा सकम्पौ बभूवतुः प्राप हि तत्समीपम् ।।७२।।

ततः कालभटगृहीतमवनीशं मोचयित्वा जित्वा किङ्करयुगं आत्मपुरस्स-न्निधाय नन्दिनं विमानं कुर्वतोः प्रमथयोः कैलासाभिमुखमभवत् ।

गणौ नृपायाध्वनि पुण्यवार्तां उदीरयन्तौ सहसा विमानात्
सन्दर्शयन्तावथ लोकजालं तं निन्यतुः कालपुरोपकण्ठम् ।।७३।।

ततस्सभाम् आलोकय कालस्येति प्रमथनिर्दिश्यमानः स तामद्राक्षीत्।

तत्र रत्नसिंहासने समुपविश्य अनलकणोद्गारिनयनयुगलः करालरदनैः रदनच्छदं निष्पीडयन् मुहुः मुहुः किङ्करानाहूय विस्त्रममुं हरद्वेषिणम् अनलपरितप्ततैलपूरितायस्पात्रे पातयत द्विजमिमं हरिनिन्दा-सक्तमानसम् असिपत्रवने संस्थापयत विदारयतास्य वणिग्व्यापारस्य उदरम् असिव्रातेन महीसुरस्य अवलम्बितकृषीवलोद्यमस्य परशुभिः करचरणानग्रजन्मनः छेदयतेमं नृपम् अन्तर्वाणीषु कुतलाधि-वसत्सुपरिषदि सदोन्नतासननिषण्णं सन्धास्य शूलाग्रे शिरसि

CC-0. In Public Domain. Digitization Muthulakshmi Research Academy

गदाभिस्ताडयत एनं राजानम् अन्यविलासिनीनिगूहनरतं पावक-दन्दह्यमानायस्तम्भलग्नं कृत्वा नेत्रयुगले विकिरतानलमुर्मुरममुं बाहुजम् अवनीसुरद्वेषिणं सन्तापय गदाप्रहारैस्सकलावयवेष्वस्य राज्ञः पृथ्वीसुरान् कृध्यतः समुत्पाटयत नेत्रयुगलं खरनखरैः अस्यावनीजानेः सर्वंसहादेव क्षेत्रहारिणः क्षेत्रं झर्झरितं कारयत करटखरचञ्चुभिः अन्यसम्पद्वृद्धि-मालोक्य परितप्तहृदयमिमं कुरुत कङ्कसितचञ्चुहत नयनमस्योल्लेखयत। परनिन्दाश्रवणरतस्य अनलपरितप्तलोहशलाकाभिः श्रोत्रयुगलमस्य, रसनां छेदयत सज्जनकुवादरताधियः सितक्षुरिकाभिः पाटयतास्य परनितम्बिनीकुचकुम्भस्पर्शार्थिनो मुसलैर्वक्षस्थलम् एनं पुरोभागिन-मिक्षुयन्त्रे निधाय भ्रमयत इमां स्वैरिणीं बाधयत मदमहिषखरखुरैरेतां कान्तां भर्तृवञ्चनीमुलूखले मुसलैः संस्थाप्य पीडयत, एनाम् अनवरतपरशरणचारिणीं बध्नीत प्रज्वलत्पावकायस्तम्भमूले लोहपाशै-श्चूर्णयत इमां अर्भकघातिनीं घरट्टेन इमां परुषवादिनीमार्यजनम् अनवरतं बाधयत घोरवृश्चिकैः इमं कृपीवलं स्नानतपस्सक्तम् अग्निकुण्डे निधाय घृतधारां ददत इमं पादजम् अवनीसुरक्षेत्रफलहारिणम् पाठयत परशुभिरिति वदन्तमालोक्य आराद्दण्डधरं साश्चर्यः प्रमथाभिमुखो भूत्वा अस्य जनस्य युष्मद्दर्शनं खलु आपन्निवारणं किमर्थं मत्कष्टकारिणौ किङ्करौ कालदर्शनार्थमनागताविति उक्तवति करालवक्त्रे सखे तयोरिदानीमेव आगत्य शमनाय यावत्कथामुक्तवतोस्ताभ्यां सह सहसा सहस्रकरिरागमिष्यसि कैलासमिति उदीर्य वर्त्मनि निखिललोकजालं अवनीशाय संदर्शयन्तौ भगवतः साम्बमूर्ते श्चरणसन्निधिं नृपं निन्यतुः।

In Public domain. Digitization Muthulakshmi Research Academy

ततः करालवक्त्रः प्रणम्य भगवतश्चरणयुगलं जगदीश्वरस्य अमन्दानन्द-कन्दलितान्तरङ्गः शिरसि निधाय अञ्जलिमित्युवाच ।

नमोऽस्तु ते शङ्कर शूलपाणे पिनाकिने शत्रुविदारकाय ।
नमोऽस्तु पद्मोद्भवजिष्णुमौले रत्नप्रभाभासितपपादपद्मा ।।७४।।

पद्मेशपूजोल्लसदन्तरङ्गं रङ्गज्जटामध्यविराजदब्जम् ।
अब्जालिकोट्युज्वलदेहकान्तं कान्तं नमामि प्रभुमद्रिजायाः।।७५।।

परिहृतरिपुजालं पावकाञ्चितसुफालं
विबुधविनुतिमोदं वेदमञ्जीरपादम् ।
भुवनविवरतूणं पुण्डरीकाक्षबाणं
नगवरकृतगेहं नौमि कल्याणदेहम् ।।७६।।

लोकान् स्पृशन् शङ्कर पोषयन् त्वं संहारयन् दीव्यसि फालनेत्र।
विभोमहेशाय परात्पराय ओङ्काररूपाय नमो नमस्ते ।।७७।।

नमोस्तु सोमाय शिवाय देव देवाय भीमाय हृतान्तकाय ।
पुरारये कुम्भिनिशाचरानि ना.. कठीराय नमो नमोस्ते ।।७८।।

नमोऽस्तु ते शेषफणाग्ररत्न प्रभास्फुरत्कर्णतलाञ्चिताय ।
अशेषदिक्पालकिरीटकोटिसङ्घट्टनोद्दीप्तपदद्वयाय ।।७९।।

नमोऽस्तु वागीश नमोऽस्तु विष्णो नमोऽस्तु फालाक्ष नमस्सुरेन्द्र।
नमश्शुचे काल नमोऽस्त्रपास्तु नमोऽस्तु पाशिन् पृषदश्व तुभ्यम्।।८०।।

In Public domain. Digitization Muthulakshmi Research Academy

नमोऽस्तु यक्षपदिक्स्वरूप नमोऽस्तु भानो कुमुदैकमित्र ।
नमोऽस्तु सर्वेश नमः प्रबो मां रक्षेत्युदीर्याथ पुरः पपात ।।८१।।

ततः स्वचरणतलनिहितमस्तकम् उपस्पृश्य करेण करालवक्त्रम् आत्मसमीपे निषण्णं कृत्वा वत्सत्वं प्राणान् समुत्सृजन मे नामद्वयेन त्वदीरितेन आमोदितोऽस्मि इह तुत्व या विरचितश्लोकाष्टकेन अस्मि भृशं प्रीणीतः सदा यो जनः पठेत् इममष्टकम् अस्मत्समीपे स वर्तते किल्बिष इत्युक्तवति महादेवे जय निखिल जगदाधार जय परात्पर जय दिगीश्वरैश्वर्यकारण, जय भक्तपालनपरायण जयाच्युतानन्ताद्वय, जय निर्वाच्य निरीश निर्गुण इत्युदीरयन् सरयमागत्य भटैस्सह चरणयुगले पपात परमेश्वरस्य कालः ।

मुहूर्तमिव स्थित्वा च उत्थाय मुकुलिताञ्जलिः परेमेश मे विज्ञापनमाकर्णय यदा भगवता भवता दक्षिणनायकत्वं दातव्यमभवत् तदा करोमि प्रजापालनं ईदृशं देवानांप्रियमद्राक्षम् अस्य दोषगणनायां चित्रगुप्तोऽप्यसमर्थः राज्यमुत्सृज्य मृगयासक्तमतिः अमात्याभिप्राय-मबुध्वा काननान्यवाप्य तत्रान्यकुलनितम्बिनीमालोक्य हीनकुलजा-सङ्गमार्थमवाप्य परितापं कथमप्युपलभ्य तत्संयोगम् अथ तया साकमनुभूयाशनादिकम् अपगतयुक्तायुक्तविवेकः इयं रात्रिः इदमह इत्युत्सृज्य ज्ञानम् अङ्गनासार्धम् अनङ्गसङ्गररतिः चिरं कृत्वा निवासं काननेषु पुण्यकानन निवासिनमवलोक्यशुकम् अङ्गनाज्ञया तद्ग्रहण-निहिताचित्तश्चिरं भ्रमित्वा शुकेन साकं तस्य कृते प्रासादात् पपात ।

In Public domain. Digitization Muthulakshmi Research Academy

अथ मदोन्मत्तमिमं मदाज्ञया गृहीत्वा मे किङ्करयोरायातयोः भगवतो देवस्य गणौ पीडयित्वा वेत्रलताप्रहारैः बालिशमादाय निधाय विमाने अमुना खलेन अयुक्तमवलोकितुं त्वन्नगरं निव्यतुः इत्युदीर्य चित्रगुप्तमाहूय अन्तिकस्थितं पठ करालवक्त्रव्यापारमित्युक्तवति शमने भगवान् अब्रवीत् ।

समवर्तिन् यदुक्तं भवता तत्सर्वं भवतु सत्यं किमपि शृणु वाक्यं मे अयं जनः प्रासादस्य मम प्रदक्षिणेन विगतकल्मषः अपि च योगिनामपि दुर्लभम् मेनामद्वयमुक्तम् अमुना प्राणोत्सर्जनावसरे अतः पुण्यपरे अस्मिन्नर्भके त्यज कोपम् अपि च योजनः शिव भव महादेवेत्युदीरयन् हरिमुकुन्द मुरारे अच्युतेति नामपठनतत्परः दिवारात्रं गमयति भस्मरेखाञ्चितफोलः सदा ऊर्ध्वपुण्ड्रलसल्ललाटः स्फटिकाक्ष-मालावृतगलः तुलसीबीजाक्षराजत्कन्धरः बिल्वमहीरुहप्रदक्षिणरतिः सेविताश्वत्थः श्रीफलदलाञ्चन्मौलिः तुलसीपत्रोल्लसदुत्तमाङ्गः सोऽकल्मषः तेन क्रोधस्य पात्रमतस्त्वं जागर्तुप्राणिशिक्षयामित्युदीर्य तोषयित्वा बहुमानेन शमनम् आत्मनगरं प्रेषितवान् भगवान् जगदीश्वरः।

अथाज्ञां शिरसि निधाय भगवतः परमेश्वरस्य कालः कैलासनगरद्वारोपकण्ठस्थितं रत्नघण्ठिकालसत्कण्ठम् अरुणपटालङ्कृत-पल्याणिनम् उन्नतविषाण भीषणम् आरुह्य महिषमात्मपुरमगात् ।

शिवस्य नामान्यघतूलराशेः भवन्ति वैश्वानरमुर्मुराश्च ।
अस्मिंश्च वाक्ये हि करालवक्त्रः प्रमाणमासीत्सुरलोकपाल ।।८२।।

CC-0. Digitization Muthulakshmi Research Academy

शिवप्रसादेन हि लोकजालं करस्थमाणिक्यमिवामुनैव ।
विलोक्यते तत्वमवेहि साम्बं परात्परं चाश्रितसर्वलोकम् ।।८३।।

शृण्वन्ति ये पुण्यकथां मयोक्तां पठन्ति तेषां सफला भवन्तु ।
कैलासनाथस्य कृपाभिवृद्धेः मनोरथा वासवभक्तियुक्ताः।।८४।।

इति वज्रिणमुदीर्य निर्गत्य सभायाः संविलोक्य तारकाः सवितरि पूर्वगिरिशिखरमलङ्करिष्यति द्विघटिकात्रयेणेति इति बुध्वा समासाद्य मन्दाकिनीं कृतसन्ध्याद्यनुष्ठानकलापः क्वचित् सत्यलोकं क्वचित् वैकुण्ठं क्वचित् कैलासमवलोकयन् दीव्यति महान् महाभागः ।

इति श्रीमत्कुक्कुटेश्वरप्रसादलब्धकवितासम्पादितयशस्सान्द्रेण निखिल-मन्त्रिकुलचन्द्रेण जिततानद्ध कौशलकलापेन समाराधन मुदित कुमुदहितकलापेन कौण्डिन्यगोत्रपवित्रेण कूचिमञ्चि जग्गनामात्य-पुत्रेण देवुलपल्लिकुलपयोनिधिराकासुधाकरस्य सकलविद्याकरस्य परमपवित्र विचित्रतरवाणेः सीतारामान्तर्वाणेः छात्रेण समभ्यासित-चतुश्शास्त्रेण सकलसुजनविधेयेन तिम्मकवि नामधेयेन विरचिता सुजनमनःकुमुदचन्द्रिका नाम गद्यकाव्यं समाप्तम् ।

।। शुभं भूयात् ।।

In Public domain. Digitization Muthulakshmi Research Academy

अक्षरक्रमानुगतश्लोकसूची

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
अन्यैस्सुरैर्दुर्लभमस्ति देवी	इन्द्रवज्रा	३२	36
आज्ञा यदाभूदवनीपतेस्तां	इन्द्रवज्रा	५६	50
आदाय कालस्य च	उपेन्द्रवज्रा	७१	65
आर्यां प्रसार्य दोर्युगलं	आर्या	२	1
इतरार्थतत्पराणां	आर्या	७	1
इतीरयित्वा स	उपेन्द्रवज्रा	३९	39
एकैकबाणेन	उपेन्द्रवज्रा	१६	24
एते गुणास्सन्ति महीपते	उपेन्द्रवज्रा	२०	28
कटाक्षजालैर्भ्रमरोल्लसद्भिः	उपेन्द्रवज्रा	३०	35
कस्त्वं सुतः कस्य	इन्द्रवज्रा	१८	27
कामेन निक्षिप्तसितास्त्रमब्जः	इन्द्रवज्रा	४८	43
कुसुमशेखर आसुलिनः प्रभोः	द्रुतविलम्बितम्	४७	43
कृत्वा वार्तां त्वयि यदि	मन्द्राक्रान्ता	५४	48
किं नाम ते कस्य जनस्य पुत्री	इन्द्रवज्रा	२८	34
खल्वस्ति नालीकदलायताक्ष्याः	इन्द्रवज्रा	५०	45
गङ्गातुङ्गतरङ्गसङ्गत	शार्दूलविक्रीडितम्	१२	15
गणौ नृपायाध्वनि	उपेन्द्रवज्रा	७३	66
गुणेगुणे दोषलवस्य	उपेन्द्रवज्रा	८	1
गृहेषु सौजन्यदृशा	उपेन्द्रवज्रा	४३	४०
गौरीकुचद्वन्द्व	इन्द्रवज्रा	१	1
गौरीकान्तं जितरविसुतं	मन्द्राक्रान्ता	१४	15

CC-0. Prof. Hampa Nagarajaiah Collection. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
चतुरवाणि महेशनिकेतनं	द्रुतविलम्बितम्	५८	56
चषकमथ लताङ्ग्यै	मालिनी	६६	59
जलदपटलवेणीं	मालिनी	३६	38
जाता शुभाङ्गी	इन्द्रवज्रा	४४	40
ज्ञात्वा दृष्ट्वा क्षितितलपति	शार्दूलविक्रीडितम्	४९	44
तस्माद्वनानि	इन्द्रवज्रा	२१	30
तातं ते दिगधीश	शार्दूलविक्रीडितम्	१९	28
तां पत्रिकां सव्यकरेण	इन्द्रवज्रा	५३	47
तद्वक्त्रसारेण	इन्द्रवज्रा	२४	32
त्वत्पाणिपद्मे	इन्द्रवज्रा	२७	33
दशस्वहस्सु भद्रेण	अनुष्टुप्	४५	40
दिक्पालकञ्जातदलायताक्षी	इन्द्रवज्रा	३४	38
नमस्ते भक्तसुलभे	अनुष्टुप्	३८	39
नमस्ते सर्वलोकेश	अनुष्टुप्	१३	15
नमोऽस्तु ते शङ्कर शूलपाणे	उपेन्द्रवज्रा	७४	68
नमोऽस्तु ते शेषफणाग्ररत्न	उपेन्द्रवज्रा	७९	68
नमोऽस्तु यक्षपदिक्स्वरूप	उपेन्द्रवज्रा	८१	69
नमोऽस्तु वागीश नमोऽस्तु	उपेन्द्रवज्रा	८०	68
नमोस्तु सोमाय शिवाय	उपेन्द्रवज्रा	७८	68
नरपतिकुलचन्द्रः	मालिनी	१५	24
नरपतिकुलचन्द्रः कामिनीं	मालिनी	६२	58
नितम्बिनि त्वं	उपेन्द्रवज्रा	२६	33

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
नितम्बनाभिस्फुरदूरुहस्त	उपेन्द्रवज्रा	६३	58
पद्मेशपूजोल्लसदन्तरङ्गं	इन्द्रवज्रा	७५	68
परिहृतरिपुजालं	मालिनी	७६	68
पयोधरद्वन्द्वकपालयुग्म	उपेन्द्रवज्रा	४१	39
पाञ्चालिकावीजिततालवृन्तात्	इन्द्रवज्रा	६४	59
पाषाण संघट्टनभिन्नशीर्षः	इन्द्रवज्रा	७०	65
पुष्पेषुबणैर्नृपचन्द्रसूनुः	इन्द्रवज्रा	२५	33
पुष्पैः फलैः कुङ्कुमचूर्णगन्धैः	इन्द्रवज्रा	३३	38
पुष्पासवासक्तमिलिन्दबृन्द	इन्द्रवज्रा	५५	50
पृथ्वीश्वरावङ्गजकन्यकानां	उपेन्द्रवज्रा	३१	35
प्रपितामहमहमहर	आर्या	६	1
यथाक्रमं भिल्लसरोरुहाक्ष्यां	उपेन्द्रवज्रा	४२	39
यदा महीपालवराङ्कयोगः	उपेन्द्रवज्रा	६०	58
यदाम्बुजाक्ष्याः कुचकोकयुग्मे	उपेन्द्रवज्रा	६१	58
या मञ्जरी	अनुष्टुप्	४६	40
यावद्विमानं यमकिङ्करौ	इन्द्रवज्रा	७२	66
यावद्विषाणं शिलरूपमासीत्	इन्द्रवज्रा	६९	65
युष्मत्कुलं नामनिवासभूमी	इन्द्रवज्रा	२९	34
युष्मत्समीपादचिरं वराङ्गी	इन्द्रवज्रा	५२	45
रत्नस्थापितहेमपीठलसितां	शार्दूलविक्रीडितम्	९	7
राजन्नपाङ्गैः कलिकापुत्री	आर्या	५७	52

 In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	वृत्तम्	श्लोकसङ्ख्या	पुटसङ्ख्या
लोकान् स्पृशन् शङ्कर	उपेन्द्रवज्रा	७७	68
वन्दे चन्द्रधरं वृषेन्द्रतुरगं	शार्दूलविक्रीडितम्	११	15
वन्दे रत्नकदम्बनिर्मित	शार्दूलविक्रीडितम्	३७	38
वसन्तपुत्रीं समुदीरयन्त्यो	उपेन्द्रवज्रा	५९	57
वसन्तपुत्र्या अथ कुन्तलानि	उपेन्द्रवज्रा	६५	59
विकसितजलजाक्ष्या	मालिनी	५१	45
शिवप्रसादेन हि लोकजालं	उपेन्द्रवज्रा	८३	71
शिवस्य नामान्यघतूलराशेः	इन्द्रवज्रा	८२	70
स्थित्वा क्षणं तत्र	इन्द्रवज्रा	६८	65
शनैः शनैः पश्चिमदत्तपादः	उपेन्द्रवज्रा	४०	39
शम्भोः पूजां भगवत	मन्दाक्रान्ता	२२	30
शृण्वन्ति ये पुण्यकथां	इन्द्रवज्रा	८४	71
स जयति कमलानाथः	आर्या	३	1
स पातु मत्काव्यमिभेन्द्रवक्त्रः	उपेन्द्रवज्रा	४	1
सकलमुनिसमूहैस्सेवितं	मालिनी	१०	8
सा विद्रुमोष्ठी	इन्द्रवज्रा	२३	32
सारङ्गशाबन् तुरगस्य	इन्द्रवज्रा	१७	24
स्रवदमलरसमरन्दां	आर्या	५	1
हस्ताग्रसंस्थापितमण्डलाग्रां	इन्द्रवज्रा	३५	38

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

Preamble

Sanskrit Academy, is a research Institute functioning as Adarsh Sanskrit Shodha Sansthan under Central Sanskrit University, New Delhi, has been undertaking the noble tasks of publishing invaluable Sanskrit works, translating rare manuscripts and imparting basics in the Sanskrit language to the interested students, holding workshops and seminars, promoting Sanskrit language by various academic activities. This Institution is the oldest and the only Research Centre under the aegis of Osmania University, Hyderabad, is contributing in the field of Sanskrit Research. Sanskrit Academy, aiming at promoting Sanskrit learning in general and research in particular has brought about 150 publications valued to be possessing high research standards.

Sanskrit Academy established with three aims and objectives are as under:-

I. To collect, preserve and investigate old and rare Sanskrit Manuscripts

II. To Edit and publish rare Sanskrit Manuscripts and also to undertake the publications of research work pertaining to Sanskrit

III. To promote Sanskrit learning in general and research in particular.

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2023
ISBN 978-93-80171-94-4